[KYV TA 10]
(Parts highlighted in grey originally belong to the Upaniṣhat, but are not chanted nowadays. This is the index portion short-listing all the mantras in the preceding portion, this was originally chanted when written indexes were not available and the entire Veda was committed to memory only.)

[१०-०-०] [10-0-0]

ॐ स॒ह ना॑ववतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यं॑ करवावहै ।
ते॒ज॒स्वि ना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै॓ ।
ॐ saha nāvavatu | saha nau bhunak'tu |
saha vīr'yaṅ' karavāvahai |
tējas'vi nāvadhītamas'tu mā vid'viṣhāvahaiī |

ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||

[१०-१-१] [10-1-1]

अम्भ॑स्य पा॒रे भुव॑नस्य॒ मध्ये॒ नाक॑स्य पृ॒ष्ठे म॑ह॒तो मही॑यान् ।
am'bhas'ya pārē bhuvanas'ya madh'yē
nākas'ya pṛṣh'ṭhē mahatō mahīyā-ne |

शु॒क्रेण॒ ज्योती॑ꣳषि समनु॒प्रवि॑ष्टः प्र॒जाप॑तिश्चरति॒ गर्भे॑ , अ॒न्तः ।
śhuk'rēṇaj' jyōtīgm'ṣhi samanup'raviṣh'ṭa[fp]'
prajāpatiśh'charati gar'bhē , an'taḥa |

यस्मि॑न्नि॒दꣳ सं च॒ वि चैति॒ सर्वं॒ यस्मि॑न्दे॒वा , अधि॒ विश्वे॑ नि॒षेदुः॑ ।
yas'min'nidagm' sañ' cha vi chaiti sar'vañ'
yas'min'dēvā , adhi viśh'vē niṣhēduḥu |

तदेव भूतं तदु भव्यमा , इदं तदक्षरे परमे व्योमन्न् ।

tadēva bhūtan' tadu bhav'yamā , idan' tadak'ṣharē
paramēv' vyōman'ne ।

येनावृतं खं च दिवं महीं च येनादित्यस्तपति तेजसा भ्राजसा च ।

yēnāvṛtaṅ' khañ' cha divam' mahīñ'
cha yēnādit'yas'tapati tējasāb' bhrājasā cha ।

यमन्तस्समुद्रे कवयो वयन्ति यदक्षरे परमे प्रजाः ।

yaman'tas'samud'rē kavayō vayan'ti yadak'ṣharē
paramēp' prajā-ḥa ।

यतः प्रसूता जगतः प्रसूती तोयेन जीवान्व्यचसर्ज भूम्याम् ।

yata[fp]' prasūtā jagata[fp]' prasūtī
tōyēna jīvān'vyachasar'ja bhūm'yāām ।

यदोषधीभिः पुरुषान्पशूंश्च विवेश भूतानि चराचराणि ।

yadōṣhadhībhi[fp]' puruṣhāān'paśhūgeśh'cha vivēśha
bhūtāni charācharāṇi ।

अतः परं नान्यदणीयसं हि परात्परं यन्महतो महान्तम् ।

ata[fp]' paran' nān'yadaṇīyasagm' hi parāāt'parañ'
yan'mahatō mahān'tam'm ।

यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात् ॥ १ ॥

yadēkamav'yak'tamanan'tarūpaṁ' viśh'vam' purāṇan'
tamasa[fp]' paras'tā-te ॥ 1 ॥

www.sanatanaveda.net

[१०-१-२]   [10-1-2]

तदे॒वर्तं तदु॒ स॒त्यमा॑हु॒स्तदे॒व ब्रम्ह॑ पर॒मं क॑वी॒नाम् ।

tadēvar’tan’ tadu sat’yamāhus’tadēvab’

bram’ha paramaṁ’ kavīnām ।

इ॒ष्टा॒पू॒र्तं ब॑हु॒धा जा॒तं जाय॑मानं वि॒श्वं बि॑भर्ति॒ भुव॑नस्य॒ नाभि॑ः ।

iṣh’ṭāpūr’tam’ bahudhā jātañ’ jāyamānam’

viśh’vam’ bibhar’ti bhuvanas’ya nābhiḥi ।

तदे॒वाग्निस्तद्वा॒युस्तत्सूर्य॒स्तदु॒ च॒न्द्रमा॑ः ।

tadēvāg’nis’tad’vāyus’tat’sūr’yas’tadu chan’dramāāḥa ।

तदे॒व शु॒क्रम॒मृ॒तं तद्ब्रम्ह॒ तदा॒पस्स प्र॒जाप॑तिः ।

tadēva śhuk’ramamṛtan’

tad’bram’ha tadāpas’sap’ prajāpatiḥi ।

सर्वे॑ नि॒मे॒षा ज॒ज्ञिरे॑ वि॒द्युतः॒ पुरु॑षा॒दधि॑ ।

sar’vē nimēṣhā jaj’ñirē vid’yuta[fp]’ puruṣhādadhi ।

क॒ला मु॑हू॒र्ताः काष्ठा॑श्चाहोरा॒त्राश्च॑ स॒र्वशः ।

kalā muhūr’tā[hk]’

kāṣh’ṭhāśh’chāhōrāt’rāśh’cha sar’vaśhaḥa ।

अ॒र्ध॒मा॒सा मासा॑ , ऋ॒तव॑स्संवत्स॒रश्च॑ कल्पन्ताम् ।

ar’dhamāsā māsā ,

ṛtavas’saṁ’vat’saraśh’cha kal’pan’tām ।

स , आप॑ः प्रदु॒घे , उ॒भे , इ॒मे , अ॒न्तरि॑क्षमथो॒ सुव॑ः ।
sa , āpa[fp]’ pradughē , ubhē , imē ,
an’tarik’ṣhamathō suvaḥa ।

नैन॑मू॒र्ध्वं न ति॒र्यञ्चं॒ न मध्ये॒ परि॑जग्रभत् ।
nainamūrdh’van’ na tir’yañ’chan’ na madh’yē
parijag’rabhate ।

न तस्ये॑शे॒ कश्च॒न तस्य॑ नाम म॒हद्यश॑ः ॥ २ ॥
na tas’yēśhē kaśh’chana tas’ya nāma
mahad’yaśhaḥa ॥ 2 ॥

[१०-१-३]   [10-1-3]

न सं॒दृशे॑ तिष्ठति॒ रूप॑मस्य॒ न चक्षु॑षा पश्यति॒ कश्च॒नैन॑म् ।
na san’dṛśhē tiṣh’ṭhati rūpamas’ya na chak’ṣhuṣhā
paśh’yati kaśh’chanainam’m ।

हृ॒दा म॑नी॒षा मन॑सा॒ऽभिक्लृ॑प्तो॒ य , ए॑नं वि॒दुरमृ॑ता॒स्ते भ॑वन्ति ।
hṛdā manīṣhā manasā (a)bhiklṛp’tō ya ,
ēnaṁ’ viduramṛtās’tē bhavan’ti ।

अ॒द्भ्यस्संभू॑तो॒ हिरण्यग॒र्भ , इ॒त्य॒ष्टौ ।
ad’bhyas’sam’bhūtō hiraṇ’yagar’bha , it’yaṣh’ṭau ।

ए॒ष हि दे॒वः प्र॒दिशो॒ऽनु॒ सर्वा॒ः पूर्वो॑ हि जा॒तस्स , उ॒ गर्भे॑ , अ॒न्तः ।
ēṣha hi dēva[fp]’ pradiśhō (a)nu sar’vā[fp]’ pūr’vō hi
jātas’sa , u gar’bhē , an’taḥa ।

स वि॒जाय॑मानस्स जनि॒ष्यमा॑णः प्र॒त्यङ्मुखाँ॑स्तिष्ठति वि॒श्वतो॑मुखः ।
sa vijāyamānas'sa janiṣh'yamāṇa[fp]'
prat'yaṅ'mukhāās'tiṣh'ṭhati viśh'vatōmukhaḥa ।

वि॒श्वत॑श्चक्षुरु॒त वि॒श्वतो॑मुखो वि॒श्वतो॑हस्त , उ॒त वि॒श्वत॑स्पात् ।
viśh'vataśh'chak'ṣhuruta viśh'vatōmukhō
viśh'vatōhas'ta , uta viśh'vatas'pā-te ।

सं बा॒हुभ्यां॒ नम॑ति॒ सं पत॑त्रै॒र्द्यावा॑पृ॒थिवी ज॒नय॑न्दे॒व , एकः॑ ।
sam' bāhubh'yān' namati sam'
patat'rair'dyāvāpṛthivī janayan'dēva , ēkaḥa ।

वे॒नस्तत्पश्य॒न्विश्वा॒ भुव॑नानि वि॒द्वान्-य॒त्र विश्वं॒ भव॒त्येक॑नीळम् ।
vēnas'tat'paśh'yan'viśh'vā bhuvanāni vid'vā-ne
yat'ra viśh'vam' bhavat'yēkanīḻam ।

यस्मि॑न्नि॒दग्ं सं च॒ वि चैक॒ग्ं॒ स , ओत॒ः प्रोत॑श्च वि॒भुः प्र॒जासु॑ ।
yas'min'nidagm' sañ' cha vi chaikagm' sa ,
ōta[fp]' prōtaśh'cha vibhu[fp]' prajāsu ।

प्र तद्वो॑चे , अ॒मृत॒ं नु वि॒द्वान्ग॑न्ध॒र्वो नाम॒ निहि॑त॒ं गुहा॑सु ॥ ३ ॥
pra tad'vōchē , amṛtan' nu vid'vān'gan'dhar'vō
nāma nihitaṅ' guhāsu ॥ 3 ॥

[१०-१-४] [10-1-4]

त्रीणि॑ प॒दा निहि॑ता॒ गुहा॑सु॒ यस्तद्वेद॑ सवि॒तुः पि॒ता स॑त् ।
trīṇi padā nihitā guhāsu yas'tad'vēda
savitu[fp]' pitā sate ।

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा ।
sa nō ban'dhur'janitā sa vidhātā
dhāmāni vēda bhuvanāni viśh'vāā ।

यत्र देवा , अमृतमानशानास्तृतीये धामान्यभ्यैरयन्त ।
yat'ra dēvā , amṛtamānaśhānās'tṛtīyē
dhāmāān'yabh'yairayan'ta ।

परि द्यावापृथिवी यन्ति सद्यः परि लोकान्परि दिशः परि सुवः ।
parid' dyāvāpṛthivī yan'ti sad'ya[fp]'
pari lōkān'pari diśha[fp]' pari suvaḥa ।

ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्प्रजासु ।
ṛtas'ya tan'tuṁ' vitataṁ'
vichṛt'ya tadapaśh'yat'tadabhavat'prajāsu ।

परीत्य लोकान्परीत्य भूतानि परीत्य सर्वाः प्रदिशो दिशश्च ।
parīt'ya lōkān'parīt'ya bhūtāni parīt'ya sar'vāā[fp]'
pradiśhō diśhaśh'cha ।

प्रजापतिः प्रथमजा , ऋतस्यात्मनाऽऽत्मानमभिसंबभूव ।
prajāpati[fp]' prathamajā , ṛtas'yāt'manā
(ā)t'mānamabhisam'babhūva ।

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
sadasas'patimad'bhutam'
priyamin'dras'ya kām'yam'm ।

www.sai veda.net

सनिं॑ मे॒धाम॑यासिषम् ।
sanim' mēdhāmayāsiṣham |

उद्दी॒॑प्यस्व जातवेदोऽप॒घ्नन्निर्-॑ऋतिं॒ मम॑ ॥ ४ ॥
ud'dīīp'yas'va
jātavēdō (a)pagh'nan'nir'ṛtim' mama || 4 ||

[१०-१-५] [10-1-5]

प॒शूꣳ॑श्च॒ मह्य॒माव॑ह॒ जीव॑नं च॒ दिशो॑ दिश ।
paśhūgeśh'cha mah'yamāvaha jīvanañ'
cha diśhō diśha |

मा नो॑ हिꣳसीज्जातवेदो॒ गामश्वं॒ पुरु॑षं॒ जग॑त् ।
mā nō higm'sīj'jātavēdō gāmaśh'vam'
puruṣhañ' jagate |

अबि॑भ्र॒दग्न॒ , आग॑हि श्रि॒या मा॒ परि॑पातय ।
abibh'radag'na , āgahiśh' śhriyā mā paripātaya |

पुरु॑षस्य विद्म सहस्रा॒क्षस्य॑ महादे॒वस्य॑ धीमहि ।
puruṣhas'ya vid'ma sahas'rāk'ṣhas'ya
mahādēvas'ya dhīmahi |

तन्नो॑ रुद्रः प्रचो॒दया॑त् ।
tan'nō rud'ra[fp]' prachōdayāāte |

तत्पुरु॑षाय वि॒द्महे॑ महादे॒वाय॑ धीमहि ।
tat'puruṣhāya vid'mahē mahādēvāya dhīmahi |



www.vedaNet.net

तन्नो॑ रुद्रः प्रचो॒दया॑त् ।

tan’nō rud’ra[fp]’ prachōdayāāte |

तत्पुरु॑षाय वि॒द्महे॑ वक्रतु॒ण्डाय॑ धीमहि ।

tat’purushāya vid’mahē vak’ratuṇ’ḍāya dhīmahi |

तन्नो॑ द॒न्तिः प्रचो॒दया॑त् ।

tan’nō dan’ti[fp]’ prachōdayāāte |

तत्पुरु॑षाय वि॒द्महे॑ चक्रतु॒ण्डाय॑ धीमहि ॥ ५ ॥

tat’purushāya vid’mahē chak’ratuṇ’ḍāya dhīmahi || 5 ||

[१०-१-६] [10-1-6]

तन्नो॑ न॒न्दिः प्रचो॒दया॑त् ।

tan’nō nan’di[fp]’ prachōdayāāte |

तत्पुरु॑षाय वि॒द्महे॑ महासे॒नाय॑ धीमहि ।

tat’purushāya vid’mahē mahāsēnāya dhīmahi |

तन्न॑ष्षण्मुखः प्रचो॒दया॑त् ।

tan’naṣh’ṣhaṇ’mukha[fp]’ prachōdayāāte |

तत्पुरु॑षाय वि॒द्महे॑ सुवर्णप॒क्षाय॑ धीमहि ।

tat’purushāya vid’mahē suvar’ṇapak’ṣhāya dhīmahi |

तन्नो॑ गरुडः प्रचो॒दया॑त् ।

tan’nō garuḍa[fp]’ prachōdayāāte |

www.SaiVeda.net

वेदात्मनाय॑ विद्महे॑ हिरण्यगर्भाय॑ धीमहि ।

vēdāt’manāya vid’mahē hiraṇ’yagar’bhāya dhīmahi |

तन्नो॑॑ ब्रम्ह प्रचोदया॑॑त् ।

tan’nōōb’ bram’hap’ prachōdayāāte |

नारायणाय॑ विद्महे॑ वासुदेवाय॑ धीमहि ।

nārāyaṇāya vid’mahē vāsudēvāya dhīmahi |

तन्नो॑ विष्णुः प्रचोदया॑॑त् ।

tan’nō viṣh’ṇu[fp]’ prachōdayāāte |

वज्रनखाय॑ विद्महे॑ तीक्ष्णदꣳष्ट्राय॑ धीमहि ॥ ६ ॥

vaj’ranakhāya vid’mahē
tīk’ṣhṇadag’geṣh’ṭrāya dhīmahi || 6 ||

[१०-१-७] [10-1-7]

तन्नो॑ नारसिꣳहः प्रचोदया॑॑त् ।

tan’nō nārasigm’ha[fp]’ prachōdayāāte |

भास्कराय॑ विद्महे॑ महद्युतिकराय॑ धीमहि ।

bhās’karāya vid’mahē mahad’yutikarāya dhīmahi |

तन्नो॑ , आदित्यः प्रचोदया॑॑त् ।

tan’nō , ādit’ya[fp]’ prachōdayāāte |

वैश्वानराय॑ विद्महे॑ लालीलाय॑ धीमहि ।

v aiśh’vānarāya vid’mahē lālīlāya dhīmahi |

www.SaiVeda.net

तन्नों , अग्निः प्रचोदयात् ।
tan’nō , ag’ni[fp]’ prachōdayāāte ।

कात्यायनाय विद्महे कन्यकुमारि धीमहि ।
kāt’yāyanāya vid’mahē kan’yakumāri dhīmahi ।

तन्नों दुर्गिः प्रचोदयात् ।
tan’nō dur’gi[fp]’ prachōdayāāte ।

सहस्रपरमा देवी शतमूला शताङ्कुरा ।
sahas’raparamā dēvī śhatamūlā śhatāṅ’kurā ।

सर्वꣳ हरतु मे पापं दूर्वा दुस्स्वप्ननाशनी ।
sar’vagm’ haratu mē pāpan’ dūr’vā
dus’svap’nanāśhanī ।

काण्डात्काण्डात्प्ररोहन्ती परुषःपरुषः परि ॥ ७ ॥
kāṇ’ḍāāt’kāṇ’ḍāt’prarōhan’tī
paruṣha[fp]’paruṣha[fp]’ pari ॥ 7 ॥

[१०-१-८] [10-1-8]

एवा नों दूर्वे प्रतनु सहस्रेण शतेन च ।
ēvā nō dūr’vēp’ pratanu sahas’rēṇa śhatēna cha ।

या शतेन प्रतनोषि सहस्रेण विरोहसि ।
yā śhatēnap’ pratanōṣhi sahas’rēṇa virōhasi ।

www.SaiVeda.net

तस्याँस्ते देवीष्टके विधेमं हविषा वयम् ।

tas'yāās'tē dēvīṣh'ṭakē vidhēma haviṣhā vayam ।

अश्वक्रान्ते रथक्रान्ते विष्णुक्राँन्ते वसुन्धरा ।

aśh'vak'rān'tē rathak'rān'tē

vish'ṇuk'rāān'tē vasun'dharā ।

शिरसा धारयिष्यामि रक्षस्व माँ पदेपदे ।

śhirasā dhārayiṣh'yāmi rak'ṣhas'va māām' padēpadē ।

भूमिर्धेनुर्धरणी लोकधारिणी ।

bhūmir'dhēnur'dharaṇī lōkadhāriṇī ।

उद्धृताऽसि वराहेण कृष्णेन शतबाहुना ।

ud'dhṛtā (a)si varāhēṇa kṛṣh'ṇēna śhatabāhunā ।

मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतम् ।

mṛt'tikē hana mē pāpañ' yan'mayā duṣh'kṛtaṅ' kṛtam ।

मृत्तिकेँ ब्रम्हदत्ताऽऽसि काश्यपेनाभिमन्त्रिता ।

mṛt'tikēēb' bram'hadat'tā (ā)si

kāśh'yapēnābhiman'tritā ।

मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् ॥ ८ ॥

mṛt'tikē dēhi mē

puṣh'ṭin' tvayi sar'vam' pratiṣh'ṭhitam ॥ 8 ॥

www.SriVeda.net

[१०-१-९]   [10-1-9]

मृत्तिके॑ प्रतिष्ठिते सर्वं॑ तन्मे निर्णुद मृत्तिके ।

mṛt'tikēēp' pratiṣh'ṭhitē

sar'van' tan'mē nir'ṇuda mṛt'tikē ।

तया॑ हतेन॑ पापेन गच्छामि प॑रमां गतिम् ।

tayā hatēna pāpēna gat'chhāmi paramān' gatim ।

यत॑ , इन्द्र भया॑महे तता॑ नो , अभ॑यं कृधि ।

yata , in'dra bhayāmahē tatō nō , abhayan' kṛdhi ।

मघ॑वञ्छग्धि तव तन्न॑ , ऊतये विद्विषो विमृधो॑ जहि ।

maghavañ'chhag'dhi tava tan'na ,

ūtayē vid'viṣhō vimṛdhō jahi ।

स्वस्तिदा विशस्पति॑र्वृत्रहा विमृधो॑ वशी ।

svas'tidā viśhas'patir'vṛt'rahā vimṛdhō vaśhī ।

वृषेन्द्र॑ः पुर , ए॑तु नस्स्वस्तिदा , अ॑भयंकरः ।

vṛṣhēn'dra[fp]' pura , ētu nas'svas'tidā ,

abhayan'karaḥa ।

स्वस्ति न , इन्द्रो॑ वृद्धश्र॑वास्स्वस्ति न॑ः पूषा विश्ववे॑दाः ।

svas'ti na , in'drō vṛd'dhaśh'ravās'svas'ti na[fp]'

pūṣhā viśh'vavēdā-ḥa ।



www.Sai-Veda.net

स्व॒स्ति न॒स्तार्क्ष्यो॒ , अरि॑ष्टनेमिस्स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु ।
svas’ti nas’tārk’ṣhyō ,
arịṣh’ṭanēmis’svas’ti nō bṛhas’patir’dadhātu |

आपा॑न्तमन्युस्तृ॒पल॑प्रभर्मा॒ धुनि॒श्शिमी॑वा॒ञ्छरु॑माꣳ , ऋजी॒षी ।
āpāān’taman’yus’tṛpalap’rabhar’mā
dhuniśh’śhimīvāñ’chharumāgm’ , ṛjīṣhī |

सोमो॒ विश्वा॑न्यत॒सा वना॑नि॒ नार्वा॑गिन्द्रं॑ प्रति॒माना॑नि दे॒भुः ॥ ९ ॥
sōmō viśh’vāān’yatasā vanāni nār’vāgin’dram’
pratimānāni dēbhuḥu || 9 ||

[१०-१-१०] [10-1-10]

ब्रम्ह॑ जज्ञा॒नं प्र॑थ॒मं पु॒रस्ता॒द्वि सी॑म॒तस्सु॒रुचो॑ वे॒न , आ॑वः ।
bram’ha jaj’ñānam’ prathamam’
puras’tād’vi sīmatas’suruchō vēna , āvaḥa |

स बु॒ध्निया॑ , उप॒मा , अ॑स्य वि॒ष्ठास्स॒तश्च॒ योनि॒मस॑तश्च॒ विवः॑ ।
sa budh’niyā , upamā , as’ya viṣh’ṭhās’sataśh’cha
yōnimasataśh’cha vivaḥa |

स्यो॒ना पृ॑थिवि॒ भवा॑ नृक्ष॒रा नि॒वेश॑नी ।
syōnā pṛthivi bhavā nṛk’ṣharā nivēśhanī |

यच्छा॑ न॒श्शर्म॑ स॒प्रथाः॑ ।
yat’chhā naśh’śhar’ma sap’rathāāḥa |

www.SaiVeda.net

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
gan’dhad’vārān’ durādhar’ṣhān’
nit’yapuṣh’ṭāṅ’ karīṣhiṇīīm ।

ईश्वरीꣳ सर्वभूतानां तामिहोपह्वये श्रियम् ।
īśh’varīgm’ sar’vabhūtānān’
tāmihōpah’vayēśh’ śhriyam ।

श्रीर्मे भजतु ।
śhrīīr’mē bhajatu ।

अलक्ष्मीर्मे नश्यतु ।
alak’ṣhmīīr’mē naśh’yatu ।

विष्णुमुखा वै देवाश्छन्दोभिरिमाँल्लोकाननपजय्यमभ्यजयन् ।
viṣh’ṇumukhā vai dēvāśh’chhan’dōbhirimāṅl’
lōkānanapajay’yamabh’yajayan’ne ।

महाꣳ , इन्द्रो वज्रबाहुः षोडशी शर्म यच्छतु ॥ १० ॥
mahāgm’ , in’drō vaj’rabāhuṣh’
ṣhōḍaśhī śhar’ma yat’chhatu ॥ 10 ॥

[१०-१-११] [10-1-11]

स्वस्ति नो मघवा करोतु हन्तु पाप्मानं योऽस्मान्द्वेष्टि ।
svas’ti nō maghavā karōtu han’tu pāp’mānañ’
yōō (a)s’mān’dvēṣh’ṭi ।

www.Saiveda.net

सोमानङ्ग स्वरणं कृणुहि ब्रम्हणस्पते ।

sōmānag’ges’ svaraṇaṅ’ kṛṇuhib’ bram’haṇas’patē ।

कक्षीवन्तं य , औशिजम् ।

kak’ṣhīvan’tañ’ ya , auśhijam ।

शरीरं यज्ञशमलं कुसीदं तस्मिन्त्सीदतु योऽस्मान्द्वेष्टि ।

śharīrañ’ yaj’ñaśhamalaṅ’ kusīdan’

tas’min’n’tsīdatu yōō (a)s’mān’dvēṣh’ṭi ।

चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि ।

charaṇam’ pavit’raṁ’ vitatam’

purāṇañ’ yēna pūtas’tarati duṣh’kṛtāni ।

तेन पवित्रेण शुद्धेन पूता , अति पाप्मानमरातिं तरेम ।

tēna pavit’rēṇa śhud’dhēna pūtā ,

ati pāp’mānamarātin’ tarēma ।

सजोषा , इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहञ्छूर विद्वान् ।

sajōṣhā , in’dra sagaṇō marud’bhis’ sōmam’

piba vṛt’rahañ’chhūra vid’vā-ne ।

जहि शत्रूंरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ।

jahi śhat’rūgm’rapa mṛdhō

nudas’vāthābhayaṅ’ kṛṇuhi viśh’vatō naḥa ।

www.sanatanaveda.net

सुमित्रा न , आप , ओषधयस्सन्तु दुर्मित्रास्तस्मै
भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ।

sumit'rā na , āpa , ōṣhadhayas'san'tu
dur'mit'rās'tas'mai bhūyāsur'yōō (a)s'mān'
dvēṣh'ṭi yañ' cha vayan' dviṣh'mahạ ।

आपो हि ष्ठा मयोभुवस्ता न , ऊर्जे दधातन ॥ ११ ॥

āpō hiṣh' ṣhṭhā mayōbhuvas'tā na ,
ūr'jē dadhātana ॥ 11 ॥

[१०-१-१२] [10-1-12]

महे रणाय चक्षसे ।

mahē raṇāya chak'ṣhasē ।

यो वश्शिवतमो रसस्तस्य भाजयतेह नः ।

yō vaś'śhivatamō rasas'tas'ya bhājayatēha nahạ ।

उशतीरिव मातरः ।

uśhatīriva mātarahạ ।

तस्मा , अरं गमाम वो यस्य क्षयाय जिन्वथ ।

tas'mā , arañ' gamāma vō yas'yak' kṣhayāya jin'vatha ।

आपो जनयथा च नः ।

āpō janayathā cha nahạ ।

www.Saiveda.net

हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः ।

hiraṇ'yaśhṛṅ'gaṁ' varuṇam' prapad'yē

tīr'tham' mē dēhi yāchitaḥa ।

यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः ।

yan'mayā bhuk'tamasādhūnām'

pāpēbh'yaś'chap' pratig'rahaḥa ।

यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम् ।

yan'mē manasā vāchā kar'maṇā vā duṣh'kṛtaṅ' kṛtam ।

तन्न , इन्द्रो वरुणो बृहस्पतिस्सविता च पुनन्तु पुनःपुनः ।

tan'na , in'drō varuṇō bṛhas'patis'savitā

cha punan'tu puna[fp]'punaḥa ।

नमोऽग्नयेऽप्सुमते नम , इन्द्राय नमो

वरुणाय नमो वारुण्यै नमोऽद्भ्यः ॥ १२ ॥

namō (a)g'nayēē (a)p'sumatē nama ,

in'drāya namō varuṇāya namō

vāruṇ'yai namō (a)d'bhyaḥa ॥ 12 ॥

[१०-१-१३] [10-1-13]

यदपां क्रूरं यदमेध्यं यदशान्तं तदपगच्छतात् ।

yadapāṅ' krūrañ' yadamēdh'yañ'

yadaśhān'tan' tadapagat'chhatā-te ।

www.Sai Veda.net

अत्याशनाद॑तीपानाद्यच्च , उग्रात्प्र॑तिग्रहा॑त् ।
at'yāśhanādatīpānād'yat'cha , ug'rāt'pratig'rahāāte ।

तन्नो॑ वरु॑णो राजा पाणिना॑ ह्यवमर्श॑तु ।
tan'nō varuṇō rājā pāṇināāh' hyavamar'śhatu ।

सो॑ऽहम॑पापो विरजो॑ निर्मु॑क्तो मु॑क्तकिल्बिषः ।
sō (a)hamapāpō virajō nir'muk'tō muk'takil'biṣhaḥa ।

नाक॑स्य पृष्ठमारु॑ह्य गच्छेद्ब्रम्ह॑ सलो॑कताम् ।
nākas'ya pṛṣh'ṭhamāruh'ya
gat'chhēd'bram'ha salōkatām ।

यश्चाप्सु वरु॑णस्स पुनात्व॑घमर्ष॑णः ।
yaśh'chāp'su varuṇas'sa punāt'vaghamar'ṣhaṇaḥa ।

इमं मे॑ गङ्गे यमुने सरस्वति शुतु॑द्रि स्तोम॒ꣳ सचता परु॑ष्णिया ।
imam' mē gaṅ'gē yamunē saras'vati śhutud'ris'
stōmagm' sachatā paruṣh'ṇiyā ।

असिक्निया म॑रुद्वृधे वितस्तयाऽऽर्जी॑कीये शृणुह्या सुषोम॑या ।
asik'niyā marud'vṛdhē vitas'tayā (ā)r'jīkīyē
śhṛṇuh'yā suṣhōmayā ।

ऋतं च॑ सत्यं चाभी॑द्धात्तपसोऽध्य॑जायत ।
ṛtañ' cha sat'yañ' chābhīīd'dhāt'tapasō (a)dh'yajāyata ।

ततो रात्रि॑रजायत तत॑ः समुद्रो , अ॑र्णवः ॥ १३ ॥
tatō rāt'rirajāyata tatas' samud'rō , ar'ṇavaḥa ॥ 13 ॥

www.sai-veda.net

[१०-१-१४] [10-1-14]

समुद्रादर्णवादधि संवत्सरो , अजायत ।
samud’rādar’ṇavādadhi saṁ’vat’sarō , ajāyata ।

अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ।
ahōrāt’rāṇi vidadhad’viśh’vas’ya miṣhatō vaśhī ।

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।
sūr’yāchan’dramasau dhātā yathāpūr’vamakal’payate ।

दिवं च पृथिवीं चान्तरिक्षमथो सुवः ।
divañ’ cha pṛthivīñ’ chān’tarik’ṣhamathō suvaḥa ।

यत्पृथिव्याः रजस्स्वमान्तरिक्षे विरोदसी ।
yat’pṛthiv’yāgm’ rajas’svamān’tarik’ṣhē virōdasī ।

इमाँस्तदापो वरुणः पुनात्वघमर्षणः ।
imāges’tadāpō varuṇa[fp]’ punāt’vaghamar’ṣhaṇaḥa ।

पुनन्तु वसवः पुनातु वरुणः पुनात्वघमर्षणः ।
punan’tu vasava[fp]’ punātu varuṇa[fp]’
punāt’vaghamar’ṣhaṇaḥa ।

एष भूतस्य मध्ये भुवनस्य गोप्ता ।
ēṣha bhūtas’ya madh’yē bhuvanas’ya gōp’tā ।

एष पुण्यकृतां लोकानेष मृत्योर्हिरण्मयम् ।
ēṣha puṇ’yakṛtāṁ’ lōkānēṣha mṛt’yōr’hiraṇ’mayam’m ।

द्यावापृथिव्योर्हिरण्मयꣳ सꣳश्रितꣳ सुवः ॥ १४ ॥
dyāvāpṛthiv’yōr’hiraṇ’mayagm’
sag’geśh’ritagm’ suvaḥa ॥ 14 ॥

[१०-१-१५] [10-1-15]

स नस्सुवस्सꣳशिंशाधि ।
sa nas’suvas’sagm’śhiśhādhi ।

आर्द्रं ज्वलति ज्योतिरहमस्मि ।
ār’drañ’ jvalatij’ jyōtirahamas’mi ।

ज्योतिर्ज्वलति ब्रम्हाहमस्मि ।
jyōtir’jvalatib’ bram’hāhamas’mi ।

योऽहमस्मि ब्रम्हाहमस्मि ।
yō (a)hamas’mib’ bram’hāhamas’mi ।

अहमस्मि ब्रम्हाहमस्मि ।
ahamas’mib’ bram’hāhamas’mi ।

अहमेवाहं मां जुहोमि स्वाहा ।
ahamēvāham’ māñ’ juhōmis’ svāhāā ।

अकार्यकार्यवकीर्णी स्तेनो भ्रूणहा गुरुतल्पगः ।
akār’yakār’yavakīr’ṇīs’ stēnōb’ bhrūṇahā
gurutal’pagaḥa ।

www.SaiVeda.net

वरुणोऽपामघमर्षणस्तस्मात्पापात्प्रमुच्यते ।

varunō (a)pāmaghamar'shaṇas'
tas'māāt'pāpāt'pramuch'yatē ।

रजोभूमिस्त्व माꣳ रोदयस्व प्रवदन्ति धीराः ।

rajōbhūmis'tva māgm' rōdayas'vap'
pravadan'ti dhīrāāḥa ।

आक्रान्त्समुद्रः प्रथमे विधर्मञ्जनयन्प्रजा भुवनस्य राजा ।

āk'rāān'tsamud'ra[fp]' prathamē
vidhar'mañ'janayan'prajā bhuvanas'ya rājāā ।

वृषा पवित्रे , अधि सानो , अव्ये बृहत्सोमो वावृधे सुवान , इन्दुः ॥ १५ ॥

vṛshā pavit'rē , adhi sānō , av'yē bṛhat'sōmō
vāvṛdhē suvāna , in'duḥu ॥ 15 ॥

पुरस्ताद्यशो निहितं गुहासु मम चक्रतुण्डाय
धीमहि तीक्ष्णदꣳष्ट्राय धीमहि परि प्रतिष्ठितं देभुर्यच्छतु
दधातनाद्भ्योऽर्णवस्सुवो राजैकं च ॥ १ ॥

puras'tād'yaśhō nihitan' guhāsu mama
chak'ratuṇ'ḍāya dhīmahi tīk'ṣhṇadag'gesh'ṭrāya
dhīmahi parip' pratiṣh'ṭhitan'
dēbhur'yat'chhatu dadhātanād'bhyōō
(a)r'ṇavas'suvō rājaikañ' cha ॥ 1 ॥

रुद्रो रुद्रश्च दन्तिश्च नन्दिः षण्मुख , एव च ।
rud’rō rud’raśh’cha dan’tiśh’cha nan’diṣh’
ṣhaṇ’mukha , ēva cha ।

गरुडो ब्रम्ह विष्णुश्च नारसिग्ंहस्तथैव च ।
garuḍōb’ bram’ha viṣh’ṇuśh’cha
nārasigm’has’tathaiva cha ।

आदित्योऽग्निश्च दुर्गिश्च क्रमेण द्वादशाम्भसि ॥
ādit’yō (a)g’niśh’cha dur’giśh’chak’ kramēṇad’
dvādaśhām’bhasi ॥

म म व च म सु वे ना व भा वै कात्यायनाय ॥
ma ma va cha ma su vē nā va bhā vai kāt’yāyanāya ॥

[१०-२-१] [10-2-1]

जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
jātavēdasē sunavāma sōmamarātīyatō nidahāti vēdaḥa ।

स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः ।
sa na[fp]’ par’ṣhadati dur’gāṇi viśh’vā
nāvēva sin’dhun’ duritā (a)t’yag’niḥi ।

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
tāmag’nivar’ṇān’ tapasāj’ jvalan’tīṁ’
vairōchanīṅ’ kar’maphalēṣhu juṣh’ṭāām ।

www.Sai Veda net

दुर्गां दे॒वीꣴ शर॑णम॒हं प्रप॑द्ये सु॒तर॑सि तर॒से नम॑ः ।
dur'gān' dēvīgm' śharaṇamaham' prapad'yē
sutarasi tarasē namaḥa ।

अग्ने॒ त्वं पा॑रया॒ नव्यो॑ , अ॒स्मान्त्स्व॒स्तिभि॒रति॑ दु॒र्गाणि॒ विश्वा॑ ।
ag'nēt' tvam' pārayā nav'yō ,
as'mānt'svas'tibhirati dur'gāṇi viśh'vāā ।

पू॒श्च॑ पृ॒थ्वी ब॑हु॒ला न॑ , उ॒र्वी भ॑वा तो॒काय॒ तन॑याय॒ शंयोः॑ ।
pūśh'cha pṛth'vī bahulā na , ur'vī bhavā
tōkāya tanayāya śhañ'yō-ḥo ।

विश्वा॑नि नो दु॒र्गहा॑ जातवेद॒स्सिन्धुं॒ न ना॒वा दु॑रि॒ताऽति॑पर्षि ।
viśh'vāni nō dur'gahā jātavēdas'sin'dhun'
na nāvā duritā (a)tipar'ṣhi ।

अग्ने॑ , अत्रि॒वन्मन॑सा गृणा॒नो॑ऽस्माकं॑ बोध्यवि॒ता त॒नूना॑म् ।
ag'nē , at'rivan'manasā gṛṇānōō (a)s'mākam'
bōdh'yavitā tanūnāām ।

पृ॒त॒ना॒जित॒ꣴ॒ सह॑मानमु॒ग्रम॒ग्निꣴ हु॑वेम पर॒मात्स॒धस्था॑त् ।
pṛtanājitagm' sahamānamug'ramag'nigm'
huvēma paramāt'sadhas'thāāte ।

स नः॑ पर्ष॒दति॑ दु॒र्गाणि॒ विश्वा॒ क्षाम॑द्दे॒वो , अति॑दुरि॒ताऽत्य॒ग्निः ।
sa na[fp]' par'ṣhadati dur'gāṇi viśh'vāk'
kṣhāmad'dēvō , atiduritā (a)t'yag'niḥi ।

www.Salveda.net

प्रत्नोषि कमीड्यो , अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।

prat’nōṣhi kamīḍ’yō ,
adh’varēṣhu sanāt’cha hōtā nav’yaśh’cha sat’si ।

स्वां चाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व ।

svāñ’ chāāg’nē tanuvam’ pip’rayas’vās’mabh’yañ’
cha saubhagamāyajas’va ।

गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णोरनुसंचरेम ।

gōbhir’juṣh’ṭamayujō niṣhik’tan’
tavēēn’dra viṣh’ṇōranusañ’charēma ।

नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक , इह मादयन्ताम् ॥ १६ ॥

nākas’ya pṛṣh’ṭhamabhi saṁ’vasānō
vaiṣh’ṇavīṁ’ lōka , iha mādayan’tām ॥ 16 ॥

दुरिताऽत्यग्निश्चत्वारि च ॥ २ ॥
duritā (a)t’yag’niśh’chat’vāri cha ॥ 2 ॥

[१०-३-१] [10-3-1]

भूरन्नमग्नये पृथिव्यै स्वाहा भुवोऽन्नं वायवेऽन्तरिक्षाय स्वाहा
सुवरन्नमादित्याय दिवे स्वाहा

bhūran’namag’nayē pṛthiv’yais’ svāhā
bhuvō (a)n’naṁ’ vāyavē (a)n’tarik’ṣhāyas’
svāhā suvaran’namādit’yāya divēs’ svāhā

www.Salveda.net

भूर्भुव॒स्सुव॒रन्नं॑ च॒न्द्रम॑से दि॒ग्भ्यस्स्वाहा॒ नमो॑ दे॒वेभ्य॑स्स्व॒धा पि॒तृभ्यो॒ भूर्भुव॒स्सुव॒रन्न॒मोम् ॥ १७ ॥ ॥ ३ ॥

bhūr'bhuvas'suvaran'nañ' chan'dramasē dig'bhyas'svāhā namō dēvēbh'yas'svadhā pitṛbh'yō bhūr'bhuvas'suvaran'namōm ॥ 17 ॥ ॥ 3 ॥

[१०-४-१] [10-4-1]

भूर॒ग्नये॑ पृथि॒व्यै स्वाहा॒ भुवो॑ वा॒यवे॒ऽन्तरि॑क्षा॒य स्वाहा॒ सुव॑रादि॒त्याय॑ दि॒वे स्वाहा॒ भूर्भुव॒स्सुव॑श्च॒न्द्रम॑से दि॒ग्भ्यस्स्वाहा॒ नमो॑ दे॒वेभ्य॑स्स्व॒धा पि॒तृभ्यो॒ भूर्भुव॒स्सुव॒रग्न , ओम् ॥ १८ ॥ ॥ ४ ॥

bhūrag'nayē pṛthiv'yais' svāhā bhuvō vāyavē (a)n'tarik'ṣhāyas' svāhā suvarādit'yāya divēs' svāhā bhūr'bhuvas'suvaśh'chan'dramasē dig'bhyas'svāhā namō dēvēbh'yas'svadhā pitṛbh'yō bhūr'bhuvas'suvarag'na , ōm ॥ 18 ॥ ॥ 4 ॥

[१०-५-१] [10-5-1]

भूर॒ग्नये॑ च पृथि॒व्यै च॑ मह॒ते च॒ स्वाहा॒ भुवो॑ वा॒यवे॑ चा॒न्तरि॑क्षाय च मह॒ते च॒ स्वाहा॒ सुव॑रादि॒त्याय॑ च दि॒वे च॑ मह॒ते च॒ स्वाहा॒

bhūrag'nayē cha pṛthiv'yai cha mahatē chas' svāhā bhuvō vāyavē chān'tarik'ṣhāya cha mahatē chas' svāhā suvarādit'yāya cha divē cha mahatē chas' svāhā

भूर्भुव॒स्सुव॒श्चन्द्रम॑से च॒ नक्ष॑त्रेभ्यश्च दि॒ग्भ्यश्च॑ मह॒ते च॒ स्वाहा॒ नमो॑ दे॒वेभ्य॑स्स्व॒धा पि॒तृभ्यो॒ भूर्भुव॒स्सुव॒र्मह॒रोम् ॥ १९ ॥ ॥ ५ ॥

bhūr'bhuvas' suvaśh'chan'dramasē cha nak'ṣhat'rēbh'yaśh'cha dig'bhyaśh'cha mahatē chas' svāhā namō dēvēbh'yas'svadhā pitṛbh'yō bhūr'bhuvas'suvar'maharōm ॥ 19 ॥ ॥ 5 ॥

[१०-६-१] [10-6-1]

पाहि नो , अग्न , एन॑से स्वाहा॒ ।

pāhi nō , ag'na , ēnasēs' svāhā ।

पाहि नो विश्ववेद॑से स्वाहा॒ ।

pāhi nō viśh'vavēdasēs' svāhā ।

यज्ञं पाहि विभाव॑सो स्वाहा॒ ।

yaj'ñam' pāhi vibhāvasōs' svāhā ।

सर्वं॑ पाहि शतक्र॑तो स्वाहा॒ ॥ २० ॥ ॥ ६ ॥

sar'vam' pāhi śhatak'ratōs' svāhā ॥ 20 ॥ ॥ 6 ॥

[१०-७-१] [10-7-1]

पा॒हि नो॑ , अ॒ग्न॒ , एक॑या ।

pāhi nō , ag'na , ēkayā ।

पा॒ह्यु॑त द्वि॒तीय॑या ।

pāh'yutad' dvitīyayā ।

पाह्यूर्जं तृतीयंया ।
pāh’yūr’jan’ tṛtīyaya ।

पाहि गीर्भिश्श्चतसृभिर्वसो स्वाहां ॥ २१ ॥ ॥ ७ ॥
pāhi gīr’bhiś’chatasṛbhir’vasōs’ svāhāā ॥ 21 ॥ ॥ 7 ॥

[१०-८-१] [10-8-1]

यश्छन्दंसामृषभो विश्वरूपश्छन्दोभ्यश्श्चन्दाꣳस्याविवेश ।
yaś’chhan’dasāmṛṣhabhō viś’varūpaś’
chhan’dōōbh’yaś’chan’dāges’yāvivēśha ।

सचाꣳशिक्यः पुरोवाचोपनिषदिन्द्रो ज्येष्ठ , इन्द्रियाय , ऋषिभ्यो नमो
देवेभ्यंस्स्वधा पितृभ्यो भूर्भुवस्सुवश्छन्द , ओम् ॥ २२ ॥ ॥ ८ ॥
sachāgm’śhik’ya[fp]’ purōvāchōpaniṣhadin’drōōj’
jyēṣh’ṭha , in’driyāya , ṛshibh’yō namō
dēvēbh’yas’svadhā pitṛbh’yō
bhūr’bhuvas’suvaś’chhan’da , ōm ॥ 22 ॥ ॥ 8 ॥

[१०-९-१] [10-9-1]

नमो ब्रम्हणे धारणं मे , अस्त्वनिराकरणं धारयिता भूयासं
कर्णयोश्श्रुतं मा च्योढ्वं ममामुष्य , ओम् ॥ २३ ॥ ॥ ९ ॥
namōb’ bram’hanē dhāraṇam’ mē ,
as’tvanirākaraṇan’ dhārayitā bhūyāsaṅ’
kar’ṇayōś’śhrutam’ māch’ chyōōḍh’vam’
mamāmuṣh’ya , ōm ॥ 23 ॥ ॥ 9 ॥

www.SaiVeda.net

[१०-१०-१]   [10-10-1]

ऋतं तप॑स्स॒त्यं तप॑श्श्रु॒तं तप॑श्शा॒न्तं तपो॒ द॒मस्तप॒श्शम॒स्तपो॒ दा॒नं तपो॒ य॒ज्ञं तपो॒ भूर्भु॒वस्सु॒वर्ब्रम्है॒तदु॒पास्स्यै॒तत्तपः॑ ॥ २४ ॥ ॥ १० ॥

ṛtan' tapas'sat'tyan' tapaśh'śhrutan' tapaśh'śhān'tan' tapō damas'tapaśh'śhamas'tapō dānan' tapō yaj'ñan' tapō bhūr'bhuvas'suvar' bram'haitadupāās'yaitat'tapaḥa ॥ 24 ॥ ॥ 10 ॥

[१०-११-१]   [10-11-1]

यथा॑ वृ॒क्षस्य॑ संपु॒ष्पि॑तस्य दू॒राद्ग॒न्धो वा॑त्ये॒वं पुण्य॑स्य क॒र्मणो॑ दू॒राद्ग॒न्धो वा॑ति॒ यथा॑ऽसिधा॒रां क॒र्तेऽव॑हिताम॒वक्रा॒मे यद्यु॒वे यु॒वे ह॒वा॑ वि॒ह्वयि॑ष्यामि क॒र्तं प॑तिष्या॒मीत्ये॒वम॒मृता॑दा॒त्मानं॑ जुगु॒प्से॑त् ॥ २५ ॥ ॥ ११ ॥

yathā vṛk'ṣhas'ya sam'puṣh'pitas'ya dūrād'gan'dhō vāāt'yēvam' puṇ'yas'ya kar'maṇō dūrād'gan'dhō vāti yathā (a)sidhārāṅ' kar'tē (a)vahitāmavak'rāmē yad'yuvē yuvē havā vih'vayiṣh'yāmi kar'tam' patiṣh'yāmīt'yēvamamṛtādāt'mānañ' jugup'sēēte ॥ 25 ॥ ॥ 11 ॥

[१०-१२-१]   [10-12-1]

अणोरणी॑यान्मह॒तो मही॑याना॒त्मा गुहा॑यां॒ निहि॑तोऽस्य ज॒न्तोः ।

aṇōraṇīyān'mahatō mahīyānāt'mā guhāyān' nihitō (a)s'ya jan'tō-ḥo ।

तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम् ।

tamak'ratum' paśh'yati vītaśhōkō
dhātu[fp]' prasādāān'mahimānamīśham ।

सप्त प्राणाः प्रभवन्ति तस्मात्सप्तार्चिषस्समिधस्सप्त जिह्वाः ।

sap'tap' prāṇā[fp]' prabhavan'ti tas'māāt'
sap'tār'chiṣhas'samidhas'sap'ta jih'vā-ḥa ।

सप्त , इमे लोका येषु चरन्ति प्राणा गुहाशयां निहितास्सप्तसप्त ।

sap'ta , imē lōkā yēṣhu charan'tip' prāṇā
guhāśhayān' nihitās'sap'tasap'ta ।

अतस्समुद्रा गिरयश्च सर्वेऽस्मात्स्यन्दन्ते सिन्धवस्सर्वरूपाः ।

atas'samud'rā girayaśh'cha sar'vē (a)s'māt'syan'dan'tē
sin'dhavas'sar'varūpā-ḥa ।

अतश्च विश्वा , ओषधयो रसाच्च येनैष भूतस्तिष्ठत्यन्तरात्मा ।

ataśh'cha viśh'vā , ōṣhadhayō rasāāt'cha yēnaiṣha
bhūtas'tiṣh'ṭhat'yan'tarāt'mā ।

ब्रम्हा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।

bram'hā dēvānāām' padavī[hk]'
kavīnāmṛṣhir'vip'rāṇām' mahiṣhō mṛgāṇāām ।

श्येनो गृद्ध्राणाꣳ स्वधितिर्वनानाꣳ सोमः पवित्रमत्येति रेभन्न् ।

śhyēnō gṛd'dhrāṇāges' svadhitir'vanānāgm'
sōma[fp]' pavit'ramat'yēti rēbhan'ne ।

अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीꣳ सरूपाम् ।
ajāmēkāṁ' lōhitaśhuk'lakṛṣh'ṇām' bah'vīm'
prajāñ' janayan'tīgm' sarūpām ।

अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥ २६ ॥
ajōh' hyēkō juṣhamāṇō (a)nuśhētē jahāāt'yēnām'
bhuk'tabhōgāmajōō (a)n'yaḥa ॥ 26 ॥

[१०-१२-२]   [10-12-2]

हꣳसश्शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
hagm'saśh'śhuchiṣhad'vasuran'tarik'ṣhasad'dhōtā
vēdiṣhadatithir'durōṇasate ।

नृषद्वरसदृतसद्व्योमसदब्जा गोजा , ऋतजा , अद्रिजा , ऋतं बृहत् ।
nṛṣhad'varasadṛtasad'vyōmasadab'jā gōjā , ṛtajā ,
ad'rijā , ṛtam' bṛhate ।

घृतं मिमिक्षिरे घृतमस्य योनिर्घृते श्रितो घृतमुवस्य धाम ।
ghṛtam' mimik'ṣhirē ghṛtamas'ya yōnir'ghṛtēśh'
śhritō ghṛtamuvas'ya dhāma ।

अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ।
anuṣh'vadhamāvaha mādayas'vas' svāhākṛtaṁ'
vṛṣhabha vak'ṣhi hav'yam ।

www.sai veda.net

स॒मु॒द्रादू॒र्मिर्मधु॑मा॒ꣳ॒ , उदा॑रदुपा॒ꣳ॒शुना॒ सम॑मृत॒त्वमा॑नट् ।
samud’rādūr’mir’madhumāgm’ ,
udāradupāgm’śhunā samamṛtat’vamānaṭe ।

घृ॒तस्य॒ नाम॒ गुह्यं॒ यदस्ति॑ जि॒ह्वा दे॒वाना॑ममृत॑स्य॒ नाभिः॑ ।
ghṛtas’ya nāma guh’yañ’ yadas’ti jih’vā
dēvānāmamṛtas’ya nābhiḥi ।

व॒यं नाम॒ प्रब्र॑वामा घृ॒तेना॒स्मिन्य॒ज्ञे धा॑रयामा॒ नमो॑भिः ।
vayan’ nāmap’ prab’ravāmā ghṛtēnās’min’yaj’ñē
dhārayāmā namōbhiḥi ।

उप॑ ब्र॒म्हा शृ॑णवच्छ॒स्यमा॑नं॒ चतु॑श्शृ॒ङ्गोऽवमीद्गौ॒र , ए॒तत् ।
upab’ bram’hā śhṛṇavat’chhas’yamānañ’
chatuśh’śhṛṅ’gō (a)vamīd’gaura , ētate ।

च॒त्वारि॒ शृ॒ङ्गा॒ त्रयो॑ , अ॒स्य॒ पादा॒ द्वे॒ शी॒र्षे॒ स॒प्त ह॒स्ता॑सो , अ॒स्य ।
chat’vāri śhṛṅ’gāt’ trayō , as’ya pādād’ dvē śhīr’ṣhē
sap’ta has’tāsō , as’ya ।

त्रिधा॑ ब॒द्धो वृ॒षभो॒ रो॑रवीति म॒हो दे॒वो मर्त्या॒ꣳ॒ , आवि॑वेश ॥ २७ ॥
tridhā bad’dhō vṛṣhabhō rōravīti mahō dēvō
mar’tyāgm’ , āvivēśha ॥ 27 ॥

[१०-१२-३] [10-12-3]

त्रि॒धा॑ हि॒तं प॒णिभि॑र्गु॒ह्यमा॑नं॒ गवि॑ दे॒वासो॑ घृ॒तमन्व॑विन्दन्न् ।
tridhā hitam’ paṇibhir’guh’yamānaṅ’
gavi dēvāsō ghṛtaman’vavin’dan’ne ।

इन्द्र , एकꣳ सूर्य , एकं जजान वेनादेकꣳ स्वधया निष्टतक्षुः ।

in'dra , ēkagm' sūr'ya , ēkañ' jajāna

vēnādēkag'ges' svadhayā niṣh'ṭatak'ṣhuḥu ।

यो देवानां प्रथमं पुरस्ताद्विश्वाधियो रुद्रो महर्षिः ।

yō dēvānāām' prathamam' puras'tād'viśh'vādhiyō

rud'rō mahar'ṣhiḥi ।

हिरण्यगर्भं पश्यत जायमानꣳ स नो देवश्शुभया स्मृत्यास्संयुनक्तु ।

hiraṇ'yagar'bham' paśh'yata jāyamānagm' sa nō

dēvaśh'śhubhayās' smṛt'yās'sañ'yunak'tu ।

यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् ।

yas'māt'paran' nāparamas'ti kiñ'chid'yas'mān'nāṇīyō

naj' jyāyōō (a)s'ti kaśh'chite ।

वृक्ष , इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ।

vṛk'ṣha , ivas' stab'dhō divi tiṣh'ṭhat'yēkas'tēnēdam'

pūr'ṇam' puruṣhēṇa sar'vam'm ।

न कर्मणा न प्रजया धनेन त्यागेनैके , अमृतत्वमानशुः ।

na kar'maṇā nap' prajayā dhanēnat' tyāgēnaikē ,

amṛtat'vamānaśhuḥu ।

परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशन्ति ।

parēṇa nākan' nihitaṅ' guhāyāṁ'

vibh'rājadētad'yatayō viśhan'ti ।

वेदान्तविज्ञानसुनिश्चितार्थास्संन्यासयोगाद्यतयश्शुद्धसत्त्वाः ।

vēdān'tavij'ñānasuniśh'chitār'thās'
san'nyāsayōgād'yatayaśh'śhud'dhasat'tvāāḥa ।

ते ब्रम्हलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे ।

tēb' bram'halōkē tu paraān'takālē
parāmṛtāt'parimuch'yan'ti sar'vēē ।

दह्रं विपापं परमेश्मभूतं यत्पुण्डरीकं पुरमध्यसङ्स्थम् ।

dah'raṁ' vipāpam' paramēēśh'mabhūtañ'
yat'puṇ'ḍarīkam' puramadh'yasag'ges'tham ।

तत्रापि दह्रं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम् ।

tat'rāpi dah'raṅ' gaganaṁ'
viśhōkas'tas'min'yadan'tas'tadupāsitav'yam ।

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।

yō vēdādaus' svara[fp]' prōk'tō vēdān'tē
chap' pratiṣh'ṭhitaḥa ।

तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः ॥ २८ ॥

tas'yap' prakṛtilīnas'ya ya[fp]' paras'sa
mahēśh'varaḥa ॥ 28 ॥

अजोऽन्य , आविवेश सर्वे चत्वारि च ॥ १२ ॥

ajō (a)n'ya , āvivēśha sar'vē chat'vāri cha ॥ 12 ॥

[१०-१३-१]   [10-13-1]

स॒ह॒स्र॒शीर्॑षं दे॒वं वि॒श्वाक्षं॑ वि॒श्वशं॑भुवम् ।
sahas'raśhīr'ṣhan' dēvaṁ' viśh'vāk'ṣhaṁ'
viśh'vaśham'bhuvam ।

विश्वं॑ ना॒राय॑णं दे॒वम॒क्षरं॑ पर॒मं प॒दम् ।
viśh'van' nārāyaṇan' dēvamak'ṣharam'
paramam' padam ।

वि॒श्वतः॒ पर॑मन्नि॒त्यं वि॒श्वं ना॑राय॒णꣳ ह॑रिम् ।
viśh'vata[fp]' paraman'nit'yaṁ' viśh'van'
nārāyaṇagm' harim ।

विश्व॑मे॒वेदं पुरु॑ष॒स्तद्वि॒श्वमुप॑जीवति ।
viśh'vamēvēdam' puruṣhas'tad'viśh'vamupajīvati ।

पतिं॒ विश्व॑स्या॒त्मेश्व॑र॒ꣳ शाश्व॑तꣳ शि॒वम॑च्युतम् ।
patiṁ' viśh'vas'yāt'mēśh'varagm'
śhāśh'vatagm' śhivamach'yutam ।

ना॒राय॒णं म॑हाज्ञे॒यं वि॒श्वात्मा॑नं प॒राय॑णम् ।
nārāyaṇam' mahāj'ñēyaṁ'
viśh'vāt'mānam' parāyaṇam ।

ना॒राय॒ण प॑रो॒ ज्यो॒ति॒रा॒त्मा ना॑र॒य॒णः॒ प॑रः ।
nārāyaṇa parōj' jyōtirāt'mā nārayaṇa[fp]' paraha ।

www.sanskritveda.net

नारायण परं ब्रम्हतत्त्वं नारायणः परः ।
nārāyaṇa param' bram'hatat'tvan'
nārāyaṇa[fp]' paraḥa ।

नारायण परो ध्याता ध्यानं नारायणः परः ।
nārāyaṇa parōd' dhyātād' dhyānan'
nārāyaṇa[fp]' paraḥa ।

यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ॥ २९ ॥
yat'cha kiñ'chij'jagat'sar'van' dṛśh'yatēēśh'
śhrūyatē (a)pi vā ॥ 29 ॥

[१०-१३-२] [10-13-2]

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणस्स्थितः ।
an'tar'bahiśh'cha tat'sar'vaṁ'
vyāp'ya nārāyaṇas'sthitaḥa ।

अनन्तमव्ययं कविꣳ समुद्रेऽन्तं विश्वशम्भुवम् ।
anan'tamav'yayaṅ' kavigm'
samud'rē (a)n'taṁ' viśh'vaśham'bhuvam ।

पद्मकोशप्रतीकाशꣳ हृदयं चाप्यधोमुखम् ।
pad'makōśhap'ratīkāśhagm'
hṛdayañ' chāp'yadhōmukham ।

अधो निष्ठ्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति ।
adhō niṣh'ṭyā vitas'tyān'tē nābh'yāmupari tiṣh'ṭhati ।

ज्वालमालाकुलं भाती विश्वस्यायतनं महत् ।

jvālamālākulam' bhātī viśh'vas'yāyatanam' mahate ।

सन्ततꣳ शिलाभिस्तु लम्बत्याकोशसन्निभम् ।

san'tatagm' śhilābhis'tu lam'bat'yākōśhasan'nibham ।

तस्यान्ते सुषिरꣳ सूक्ष्मं तस्मिन्त्सर्वं प्रतिष्ठितम् ।

tas'yān'tē suṣhiragm' sūk'ṣhman'

tas'min'n'tsar'vam' pratiṣh'ṭhitam ।

तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः ।

tas'ya madh'yē mahānag'nir'

viśh'vār'chir'viśh'vatōmukhaḥa ।

सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः ।

sō (a)g'rabhug'vibhajan'tiṣh'ṭhan'

nāhāramajara[hk]' kaviḥi ।

तिर्यगूर्ध्वमधश्शायी रश्मयस्तस्य सन्तता ।

tir'yagūr'dhvamadhaśh'śhāyī

raśh'mayas'tas'ya san'tatā ।

सन्तापयति स्वं देहमापादतलमस्तकः ।

san'tāpayatis' svan' dēhamāpādatalamas'takaḥa ।

तस्य मध्ये वन्हिशिखा , अणीयोर्ध्वा व्यवस्थितः ।

tas'ya madh'yē van'hiśhikhā ,

aṇīyōōr'dhvāv' vyavas'thitaḥa ।

नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्वरा ।
nīlatōyadamadh'yas'thād'vid'yul'lēkhēva bhās'varā ।

नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा ।
nīvāraśhūkavat'tan'vī pītā bhāās'vat'yaṇūpamā ।

तस्याँश्शिखाया मध्ये परमात्मा व्यवस्थितः ।
tas'yāāśh'śhikhāyā madh'yē
paramāāt'māv' vyavas'thitaḥa ।

स ब्रम्ह स शिवस्स हरिस्सेन्द्रस्सोऽक्षरः परमस्स्वराट् ॥ ३० ॥
sab' bram'ha sa śhivas'sa haris'sēn'dras'
sō (a)k'ṣhara[fp]' paramas'svarā-ṭe ॥ 30 ॥

अपि वा सन्तता षट्च ॥ १३ ॥
api vā san'tatā ṣhaṭ'cha ॥ 13 ॥

[१०-१४-१] [10-14-1]

आदित्यो वा , एष , एतन्मण्डलं तपति तत्र ता , ऋचस्तदृचा मण्डलꣳ
स , ऋचां लोकोऽथ य , एष , एतस्मिन्मण्डलेऽर्चिर्दीप्यते
तानि सामानि स साम्नां लोकोऽथ य ,

ādit'yō vā , ēṣha , ētan'maṇ'ḍalan' tapati tat'ra tā ,
ṛchas'tadṛchā maṇ'ḍalagm' sa , ṛchāṁ' lōkō
(a)tha ya , ēṣha , ētas'min'maṇ'ḍalē
(a)r'chir'dīp'yatē tāni sāmāni sa sām'nāṁ'
lōkō (a)tha ya ,

www.Sai Veda.net

ए॒ष , ए॒तस्मि॑न्म॒ण्डले॒ऽर्चिषि॒ पुरु॑षस्तानि॒ यजू॒ꣳषि स यजु॑षा मण्डल॒ꣳ स यजु॑षां लो॒कस्सैषा त्र॒य्येव॑ वि॒द्या त॑पति॒ य , ए॒षो॓ऽन्तरा॑दि॒त्ये हि॑र॒ण्मय॒ः पुरु॑षः ॥ ३१ ॥ ॥ १४ ॥

ēṣha , ētas'min'man'ḍalē (a)r'chiṣhi puruṣhas'tāni yajūgm'ṣhi sa yajuṣhā man'ḍalagm' sa yajuṣhāṁ' lōkas'saiṣhāt' tray'yēva vid'yā tapati ya , ēṣhōō (a)n'tarādit'yē hiraṇ'maya[fp]' puruṣhaḥa ॥ 31 ॥ ॥ 14 ॥

[१०-१५-१] [10-15-1]

आ॒दि॒त्यो वै तेज॒ , ओजो॒ बल॒ं यश॒श्चक्षु॒श्श्रोत्र॑मा॒त्मा मनो॑ म॒न्युर्मनु॑र्मृत्युस्स॒त्यो मि॒त्रो वा॒युरा॑का॒शः प्रा॒णो लो॑कपा॒लः कः किं कं तत्स॒त्यमन्न॑ममृतो॑ जी॒वो विश्वः॑ कत॒मस्स्व॑यं॒भु ब्रम्है॒तदमृ॑त , ए॒ष पुरु॑ष ,

ādit'yō vai tēja , ōjō balañ' yaśhaśh'chak'ṣhuśh'śhrōt'ramāt'mā manō man'yur'manur'mṛt'yus'sat'yō mit'rō vāyurākāśha[fp]' prāṇō lōkapāla[hk]' ka[hk]' kiṅ' kan' tat'sat'yaman'namamṛtō jīvō viśh'va[hk]' katamas'svayam'bhub' bram'haitadamṛta , ēṣha puruṣha ,

www.sanvedal.net

एष भूतानामधिपतिर्ब्रम्हणस्सायुज्यꣳ सलोकतामाप्नोत्येतासामेव
देवतानाꣳ सायुज्यꣳ सार्ष्टिताꣳ समानलोकतामाप्नोति य ,
एवं वेदेत्युपनिषत् ॥ ३२ ॥ ॥ १५ ॥

ēṣha bhūtānāmadhipatir'bram'haṇas'sāyuj'yagm'
salōkatāmāp'nōt'yētāsāmēva dēvatānāgm'
sāyuj'yagm' sār'ṣhṭitāgm'
samānalōkatāmāp'nōti ya ,
ēvam' vēdēet'yupaniṣhate ॥ 32 ॥ ॥ 15 ॥

[१०-१६-१] [10-16-1]

निधनपतये नमः ।
nidhanapatayē namaḥa ।

निधनपतान्तिकाय नमः ।
nidhanapatān'tikāya namaḥa ।

ऊर्ध्वाय नमः ।
ūr'dhvāya namaḥa ।

ऊर्ध्वलिङ्गाय नमः ।
ūrdh'valiṅ'gāya namaḥa ।

हिरण्याय नमः ।
hiraṇ'yāya namaḥa ।

हिरण्यलिङ्गाय नमः ।
hiraṇ'yaliṅ'gāya namaḥa ।

सुवर्णा॑य॒ नमः ।
suvar'ṇāya namaḥa |

सुवर्णलि॒ङ्गाय॒ नमः ।
suvar'ṇaliṅ'gāya namaḥa |

दि॒व्याय॒ नमः ।
div'yāya namaḥa |

दि॒व्यलि॒ङ्गाय॒ नमः ॥ ३३ ॥
div'yaliṅ'gāya namaḥa || 33 ||

[१०-१६-२] [10-16-2]

भवाय॒ नमः ।
bhavāya namaḥa |

भवलि॒ङ्गाय॒ नमः ।
bhavaliṅ'gāya namaḥa |

शर्वा॑य॒ नमः ।
śhar'vāya namaḥa |

शर्वलि॒ङ्गाय॒ नमः ।
śhar'valiṅ'gāya namaḥa |

शिवाय॒ नमः ।
śhivāya namaḥa |

शिवलि॒ङ्गाय॒ नमः ।
śhivaliṅ'gāya namaḥa |

www.SaiVeda.net

ज्वलाय नमः ।

jvalāya namaḥa ।

ज्वललिङ्गाय नमः ।

jvalaliṅ'gāya namaḥa ।

आत्माय नमः ।

āt'māya namaḥa ।

आत्मलिङ्गाय नमः ।

āt'maliṅ'gāya namaḥa ।

परमाय नमः ।

paramāya namaḥa ।

परमलिङ्गाय नमः ।

paramaliṅ'gāya namaḥa ।

एतत्सोमस्य सूर्यस्य सर्वलिङ्गँ स्थापयति
पाणिमन्त्रं पवित्रम् ॥ ३४ ॥ ॥ १६ ॥

ētat'sōmas'ya sūr'yas'ya sar'valiṅ'gag'ges'
sthāpayati pāṇiman'tram' pavit'ram ॥ 34 ॥ ॥ 16 ॥

[१०-१७-१] [10-17-1]

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ।

sad'yōjātam' prapad'yāmi
sad'yōjātāya vai namō namaḥa ।

www.Sai Veda.net

भवेभवे नातिभवे भवस्व माम् ।

bhavēbhavē nātibhavē bhavas’va mām ।

भवोद्भवाय नमः ॥ ३५ ॥ ॥ १७ ॥

bhavōd’bhavāya namaḥa ॥ 35 ॥ ॥ 17 ॥

[१०-१८-१] [10-18-1]

वामदेवाय नमो ज्येष्ठाय नमश्श्रेष्ठाय नमो रुद्राय
नमः कालाय नमः कलविकरणाय नमो बलविकरणाय
नमो बलाय नमो बलप्रमथनाय नमस्सर्वभूतदमनाय
नमो मनोन्मनाय नमः ॥ ३६ ॥ ॥ १८ ॥

vāmadēvāya namōōj’ jyēṣh’ṭhāya namaśh’śhrēṣh’ṭhāya
namō rud’rāya nama[hk]’ kālāya nama[hk]’
kalavikaraṇāya namō balavikaraṇāya namō
balāya namō balap’ramathanāya
namas’sar’vabhūtadamanāya namō
manōn’manāya namaḥa ॥ 36 ॥ ॥ 18 ॥

[१०-१९-१] [10-19-1]

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।

aghōrēēbh’yō (a)tha ghōrēēbh’yō
ghōraghōratarēbh’yaḥa ।

सर्वेभ्यस्सर्व शर्वेभ्यो नमस्ते , अस्तु रुद्ररूपेभ्यः ॥ ३७ ॥ ॥ १९ ॥

sar’vēēbh’yas’sar’va śhar’vēēbh’yō namas’tē ,
as’tu rud’rarūpēbh’yaḥa ॥ 37 ॥ ॥ 19 ॥

www.sai-veda.net

[१०-२०-१]   [10-20-1]

तत्पुरुंषाय विद्महें महादेवायं धीमहि ।

tat’purushāya vid’mahē mahādēvāya dhīmahi ।

तन्नों रुद्रः प्रचोदयांत् ॥ ३८ ॥ ॥ २० ॥

tan’nō rud’ra[fp]’ prachōdayāāte ॥ 38 ॥ ॥ 20 ॥

[१०-२१-१]   [10-21-1]

ईशानस्सर्वविद्यानामीश्वरस्सर्वभूतानां ब्रम्हाधिपतिर्ब्रम्हणोऽधिपतिर्ब्रम्हा
शिवो मे , अस्तु सदाशिवोम् ॥ ३९ ॥ ॥ २१ ॥

īśhānas’sar’vavid’yānāmīśh’varas’sar’vabhūtānām’
bram’hādhipatir’bram’haṇō (a)dhipatir’bram’hā
śhivō mē , as’tu sadāśhivō-m ॥ 39 ॥ ॥ 21 ॥

[१०-२२-१]   [10-22-1]

नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय ,
उमापतये पशुपतये नमो नमः ॥ ४० ॥ ॥ २२ ॥

namō hiraṇ’yabāhavē hiraṇ’yavar’ṇāya hiraṇ’yarūpāya
hiraṇ’yapatayē (a)m’bikāpataya , umāpatayē
paśhupatayē namō namaḥa ॥ 40 ॥ ॥ 22 ॥

[१०-२३-१]   [10-23-1]

ऋतꣳ सत्यं परं ब्रम्ह पुरुषं कृष्णपिङ्गलम् ।

ṛtagm’ sat’yam’ param’ bram’ha puruṣhaṅ’
kṛṣh’ṇapiṅ’galam ।

ऊ॒र्ध्वरे॑तं वि॑रूपा॒क्षं वि॒श्वरू॑पाय वै नमो॒ नम॑ः ॥ ४१ ॥ ॥ २३ ॥
ūr’dhvarētaṁ’ virūpāk’ṣhaṁ’
viśh’varūpāya vai namō namaḥa ॥ 41 ॥ ॥ 23 ॥

[१०-२४-१] [10-24-1]

सर्वो॒ वै रु॒द्रस्तस्मै॑ रु॒द्राय॒ नमो॑ , अस्तु ।
sar’vō vai rud’ras’tas’mai rud’rāya namō , as’tu ।

पु॑रुषो॒ वै रु॒द्रस्सन्म॒हो नमो॒नम॑ः ।
purushō vai rud’ras’san’mahō namōnamaḥa ।

विश्वं॑ भू॒तं भुव॑नं चि॒त्रं ब॑हु॒धा जा॒तं जाय॑मानं च॒ यत् ।
viśh’vam’ bhūtam’ bhuvanañ’ chit’ram’
bahudhā jātañ’ jāyamānañ’ cha yate ।

सर्वो॒ ह्ये॑ष रु॒द्रस्तस्मै॑ रु॒द्राय॒ नमो॑ , अस्तु ॥ ४२ ॥ ॥ २४ ॥
sar’vōh’ hyēṣha rud’ras’tas’mai
rud’rāya namō , as’tu ॥ 42 ॥ ॥ 24 ॥

[१०-२५-१] [10-25-1]

कद्रु॒द्राय॒ प्रचे॑तसे मी॒ढुष्ट॑माय॒ तव्य॑से ।
kad’rud’rāyap’ prachētasē mīḍhuṣh’ṭamāya tav’yasē ।

वो॒चेम॒ शंत॑मꣳ हृ॒दे ।
vōchēma śhan’tamagm’ hṛdē ।

www.sai.Veda.net

सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो , अस्तु ॥ ४३ ॥ ॥ २५ ॥

sar’vōh’ hyēṣha rud’ras’tas’mai
rud’rāya namō , as’tu ॥ 43 ॥ ॥ 25 ॥

[१०-२६-१] [10-26-1]

यस्य वैकंङ्कत्यग्निहोत्रहवणी भवति
प्रत्येवास्याहुतयस्तिष्ठन्त्यथो प्रतिष्ठित्यै ॥ ४४ ॥ ॥ २६ ॥

yas’ya vaikaṅ’kat’yag’nihōt’rahavaṇī bhavatip’
prat’yēvās’yāhutayas’tiṣh’than’tyathōp’
pratiṣh’ṭhit’yai ॥ 44 ॥ ॥ 26 ॥

[१०-२७-१] [10-27-1]

कृणुष्व पाज , इति पञ्च ॥ ४५ ॥ ॥ २७ ॥

kṛṇuṣh’va pāja , iti pañ’cha ॥ 45 ॥ ॥ 27 ॥

[१०-२८-१] [10-28-1]

अदितिर्देवा गन्धर्वा मनुष्याः पितरोऽसुरास्तेषाꣳ सर्वभूतानां माता मेदिनी महता मही सावित्री गायत्री जगत्युर्वी पृथ्वी बहुला विश्वा भूता कतमा काया सा सत्येत्यमृतेति वसिष्ठः ॥ ४६ ॥ ॥ २८ ॥

aditir’dēvā gan’dhar’vā manuṣh’yāā[fp]’
pitarō (a)surās’tēṣhāgm’ sar’vabhūtānāām’
mātā mēdinī mahatā mahī sāvit’rī
gāyat’rī jagat’yur’vī pṛth’vī bahulā
viśh’vā bhūtā katamā kāyā sā
sat’yēt’yamṛtēti vasiṣh’ṭhaḥ ॥ 46 ॥ ॥ 28 ॥

www.vedavedanet

[१०-२९-१]   [10-29-1]

आपो॒ वा , इ॒दग्ं सर्वं॒ विश्वा॑ भू॒तान्याप॑ः प्रा॒णा वा , आप॑ः प॒शव॒ , आपोऽन्न॒मापोऽमृ॑त॒माप॑ः स॒म्राडापो॑ वि॒राडाप॑ः स्व॒राडाप॒श्छन्दा॒ग्ं॒स्यापो॒ ज्योती॒ग्ं॒ष्यापो॒ यजू॒ग्ं॒ष्याप॑ः स॒त्यमाप॒ः सर्वा॑ दे॒वता॒ , आपो॒ भूर्भुव॒ः सुव॒राप॒ , ओम् ॥ ४७ ॥ ॥ २९ ॥

āpō vā , idagm' sar'vaṁ' viśh'vā bhūtān'yāpa[fp]' prāṇā vā , āpa[fp]' paśhava , āpō (a)n'namāpō (a)mṛtamāpas' sam'rāḍāpō virāḍāpas' svarāḍāpaśh'chhan'dāges'yāpōj' jyōtīgeṣh'yāpō yajūgeṣh'yāpas' sat'yamāpas' sar'vā dēvatā , āpō bhūr'bhuvas' suvarāpa , ōm ॥ 47 ॥ ॥ 29 ॥

[१०-३०-१]   [10-30-1]

आप॑ः पुनन्तु पृथि॒वीं पृ॑थि॒वी पू॒ता पु॑नातु॒ माम् ।

āpa[fp]' punan'tu pṛthivīm' pṛthivī pūtā punātu mām ।

पु॒नन्तु॒ ब्रम्ह॑ण॒स्पति॒र्ब्रम्ह॑ पू॒ता पु॑नातु॒ माम् ॥

punan'tub' bram'hanas'patir'bram'ha pūtā punātu mām ॥

यदुच्छि॑ष्टमभो॒ज्यं यद्वा॑ दु॒श्चरि॑तं॒ मम॑ ।

yadut'chhiṣh'ṭamabhōōj'yañ' yad'vā duśh'charitam' mama ।

सर्वं॑ पुनन्तु॒ मामापो॑ऽस॒तां च॑ प्रति॒ग्रह॒ग्ं॒ स्वाहा॑ ॥ ४८ ॥ ॥ ३० ॥

sar'vam' punan'tu māmāpō (a)satāñ' chap' pratig'rahag'ges' svāhāā ॥ 48 ॥ ॥ 30 ॥

[१०-३१-१]   [10-31-1]

अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः ।
ag’niśh’cha mā man’yuśh’cha man’yupatayaśh’cha man’yukṛtēbh’yaḥa ।

पापेभ्यो रक्षन्ताम् ।
pāpēbh’yō rak’ṣhan’tām ।

यदन्हा पापमकार्षम् ।
yadan’hā pāpamakār’ṣham ।

मनसा वाचा हस्ताभ्याम् ।
manasā vāchā has’tābh’yām ।

पद्भ्यामुदरेण शिश्ना ।
pad’bhyāmudarēṇa śhiśh’nā ।

अहस्तदवलुम्पतु ।
ahas’tadavalum’patu ।

यत्किंच दुरितं मयि ।
yat’kiñ’cha duritam’ mayi ।

इदमहं माममृतयोनौ ।
idamaham’ māmamṛtayōnau ।

सत्ये ज्योतिषि जुहोमि स्वाहा ॥ ४९ ॥ ॥ ३१ ॥
sat’yēj’ jyōtiṣhi juhōmis’ svāhā ॥ 49 ॥ ॥ 31 ॥

www.Sai Veda.net

[१०-३२-१]   [10-32-1]

सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः ।

sūr’yaśh’cha mā man’yuśh’cha man’yupatayaśh’cha man’yukṛtēbh’yaḥa ।

पापेभ्यो रक्षन्ताम् ।

pāpēbh’yō rak’ṣhan’tām ।

यद्रात्रिया पापमकार्षम् ।

yad’rāt’riyā pāpamakār’ṣham ।

मनसा वाचा हस्ताभ्याम् ।

manasā vāchā has’tābh’yām ।

पद्भ्यामुदरेण शिश्ना ।

pad’bhyāmudarēṇa śhiśh’nā ।

रात्रिस्तदवलुम्पतु ।

rāt’ris’tadavalum’patu ।

यत्किंच दुरितं मयि ।

yat’kiñ’cha duritam’ mayi ।

इदमहं माममृतयोनौ ।

idamaham’ māmamṛtayōnau ।

सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ ५० ॥ ॥ ३२ ॥

sūr’yēj’ jyōtiṣhi juhōmis’ svāhā ॥ 50 ॥ ॥ 32 ॥

www.Sai Veda.net

[१०-३३-१] [10-33-1]

ओमित्येकाक्षरं ब्रम्ह ।

ōmit’yēkāk’ṣharam’ bram’ha ।

अग्निर्देवता ब्रम्ह , इत्यार्षम् ।

ag’nir’dēvatāb’ bram’ha , it’yār’ṣham ।

गायत्रं छन्दं परमात्मं सरूपम् ।

gāyat’rañ’ chhan’dam’ paramāt’maṁ’ sarūpam ।

सायुज्यं विनियोगम् ॥ ५१ ॥ ॥ ३३ ॥

sāyuj’yaṁ’ viniyōgam ॥ 51 ॥ ॥ 33 ॥

[१०-३४-१] [10-34-1]

आयातु वरदा देवी , अक्षरं ब्रम्ह सम्मितम् ।

āyātu varadā dēvī , ak’ṣharam’ bram’ha sam’mitam ।

गायत्रीं छन्दसां मातेदं ब्रम्ह जुषस्व मे ।

gāyat’rīīñ’ chhan’dasām’ mātēdam’
bram’ha juṣhas’va mē ।

यदन्हात्कुरुते पापं तदन्हात्प्रतिमुच्यते ।

yadan’hāāt’kurutē pāpan’ tadan’hāāt’pratimuch’yatē ।

यद्रात्रियात्कुरुते पापं तद्रात्रियात्प्रतिमुच्यते ।

yad’rāt’riyāāt’kurutē pāpan’
tad’rāt’riyāāt’pratimuch’yatē ।

सर्व॑वर्णे म॑हादे॒वि स॒न्ध्याविं॑द्ये स॒रस्वं॑ति ॥ ५२ ॥ ॥ ३४ ॥

sar’vavar’ṇē mahādēvi san’dhyāvid’yē
saras’vati ॥ 52 ॥ ॥ 34 ॥

[१०-३५-१] [10-35-1]

ओजों॑ऽसि॒ सहों॑ऽसि॒ बल॑मसि॒ भ्राजों॑ऽसि दे॒वाना॒ं धाम॒नामों॑ऽसि॒ विश्व॑मसि वि॒श्वायु॒स्सर्व॑मसि स॒र्वायुरभिभूरों गायत्रीमावा॑हया॒मि॒ सावित्रीमावा॑हया॒मि॒ सरस्वतीमावा॑हया॒मि॒ छन्दर्षीनावा॑हया॒मि॒ श्रियमावा॑हया॒मि॒ गायत्रिया गायत्रीच्छन्दो विश्वामित्र , ऋषिस्सविता देवताऽग्निर्मुखं ब्रम्हा शिरो विष्णुर्हृदयꣳरुद्रश्शिखा पृथिवी योनिः प्राणापानव्यानोदानसमाना सप्राणा श्वेतवर्णा सांख्यायनसगोत्रा गायत्री चतुर्विꣳशत्यक्षरा त्रिपदा॑ ष॒ट्कु॒क्षिः पञ्चशीर्षोपनयने विं॑नियो॒ग , ओं भूः ।

ōjō (a)si sahō (a)si balamasib’ bhrājō (a)si dēvānān’
dhāmanāmā (a)si viśh’vamasi
viśh’vāyus’sar’vamasi sar’vāyurabhibhūrōṅ’
gāyat’rīmāvāhayāmi sāvit’rīmāvāhayāmi
saras’vatīmāvāhayāmi
chhan’dar’ṣhīnāvāhayāmiśh’ śhriyamāvāhayāmi
gāyat’riyā gāyat’rīt’chhan’dō viśh’vāmit’ra ,
ṛṣhis’savitā dēvatā (a)g’nir’mukham’ bram’hā
śhirō viṣh’ṇur’hṛdayagm’rud’raśh’śhikhā
pṛthivī yōni[fp]’ prāṇāpānav’yānōdānasamānā
sap’rāṇāśh’ śhvētavar’ṇā sāṅ’khyāyanasagōt’rā
gāyat’rī chatur’vigm’śhat’yak’ṣharāt’ tripadā
ṣhaṭ’kuk’ṣhi[fp]’ pañ’chaśhīr’ṣhōpanayanē
viniyōga , ōm’ bhū-ḥu ।

ओं भुवः । ओꣳ सुवः । ओं महः । ओं जनः । ओं तपः ॥

ōm' bhuvaḥa | ōgm' suvaḥa | ōm' mahaḥa |
ōñ' janaḥa | ōn' tapaḥa ||

ओꣳ स॒त्यम् ।

ōgm' sat'yam |

ओं तत्स॑वि॒तुर्वरे॑ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि ।

ōn' tat'savitur'varēēṇ'yam' bhar'gō dēvas'ya dhīmahi |

धियो॒ यो नः॑ प्रचो॒दया॑त् ।

dhiyō yō na[fp]' prachōdayāāte |

ओमापो॒ ज्योती॒ रसो॒ऽमृतं॒ ब्रम्ह॒ भूर्भुव॒स्सुव॒रोम् ॥ ५३ ॥ ॥ ३५ ॥

ōmāpōj' jyōtī rasō (a)mṛtam' bram'ha
bhūr'bhuvas'suvarōm || 53 || || 35 ||

[१०-३६-१] [10-36-1]

उ॒त्तमे॑ शिख॑रे जा॒ते भू॒म्यां पर्व॒तमू॑र्धनि ।

ut'tamē śhikharē jātē bhūm'yām' par'vatamūr'dhani |

ब्रा॒म्हणे॑भ्योऽभ्य॑नु॒ज्ञा॒ता ग॒च्छ दे॑वि य॒थासु॑खम् ।

brām'haṇēēbh'yō (a)bh'yanuj'ñātā
gat'chha dēvi yathāsukham |

स्तु॒तो म॒या व॑रदा वे॑दमा॒ता प्रचो॒दय॒न्ती प॒वने॑ द्विजा॒ता ।

stutō mayā varadā vēdamātāp'
prachōdayan'tī pavanēēd' dvijātā |

www.saiveda.net

आयुः पृथिव्यां द्रविणं ब्रंम्हवर्चसं मह्यं
दत्त्वा प्रजातुं ब्रंम्हलोकम् ॥ ५४ ॥ ॥ ३६ ॥

āyu[fp]' pṛthiv'yān' draviṇam'
bram'havar'chasam' mah'yan' dat'tvāp'
prajātum' bram'halōkam ॥ 54 ॥ ॥ 36 ॥

[१०-३७-१] [10-37-1]

घृणिस्सूर्यं , आदित्यो न प्रभां वात्यक्षंरम् ।

ghṛṇis'sūr'ya , ādit'yō nap' prabhā vāt'yak'ṣharam ।

मधुं क्षरन्ति तद्रंसम् ।

madhuk' kṣharan'ti tad'rasam ।

सत्यं वै तद्रसमापो ज्योती रसोऽमृतं
ब्रम्ह भूर्भुवस्सुवरोम् ॥ ५५ ॥ ॥ ३७ ॥

sat'yaṁ' vai tad'rasamāpōj' jyōtī rasō (a)mṛtam'
bram'ha bhūr'bhuvas'suvarōm ॥ 55 ॥ ॥ 37 ॥

[१०-३८-१] [10-38-1]

ब्रम्हंमेतु माम् ।

bram'hamētu mām ।

मधुंमेतु माम् ।

madhumētu mām ।

ब्रम्हंमेव मधुंमेतु माम् ।

bram'hamēva madhumētu mām ।

यास्तें सोम प्रजा वत्सोऽभि सो , अहम् ।
yās’tē sōmap’ prajā vat’sō (a)bhi sō , aham ।

दुष्ष्वंप्नहन्दुरुष्षह ।
duṣh’ṣhvap’nahan’duruṣh’ṣhaha ।

यास्तें सोम प्राणाङ्स्ताञ्जुहोमि ।
yās’tē sōmap’ prāṇāges’tāñ’juhōmi ।

त्रिसुंपर्णमयाचितं ब्राम्हणाय दद्यात् ।
trisupar’ṇamayāchitam’ brām’haṇāya dad’yā-te ।

ब्रम्हहत्यां वा , एते घ्नन्ति ।
bram’hahat’yāṁ’ vā , ēteg’ ghnan’ti ।

ये ब्राँम्हणास्त्रिसुंपर्णं पठन्ति ।
yēb’ brāām’haṇās’trisupar’ṇam’ paṭhan’ti ।

ते सोमं प्राप्नुवन्ति ।
tē sōmam’ prāp’nuvan’ti ।

आसहस्रात्पङ्क्तिं पुनन्ति । ॐ ॥ ५६ ॥ ॥ ३८ ॥
āsahas’rāt’paṅ’ktim’ punan’ti । ōm ॥ 56 ॥ ॥ 38 ॥

[१०-३९-१] [10-39-1]

ब्रम्हं मेधयाँ ।
bram’ha mēdhayāā ।

www.Sai Veda.net

मधुं मे॒धयाँ ।

madhu mēdhayāā ।

ब्रम्हंमे॒व मधुं मे॒धयाँ ।

bram’hamēva madhu mēdhayāā ।

अद्या नों देव सवितः प्र॒जावंत्सावी॒स्सौभंगम् ।

ad’yā nō dēva savita[fp]’ prajāvat’sāvīs’saubhagam ।

परां दु॒ष्ष्वप्नियꣳ सुव ।

parā duṣh’ṣhvap’niyagm’ suva ।

विश्वांनि देव सवितर्दु॒रि॒तानि॒ परांसुव ।

viśh’vāni dēva savitar’duritāni parāsuva ।

यद्भ॒द्रं तन्म॒ , आसुंव ।

yad’bhad’ran’ tan’ma , āsuva ।

मधु॒ वातां , ऋताय॒ते मधुं क्षरन्ति॒ सिन्धंवः ।

madhu vātā , ṛtāyatē madhuk’ kṣharan’ti sin’dhavaḥa ।

माध्वी॑र्नस्स॒न्त्वोषंधीः ।

mādh’vīir’nas’san’tvōṣhadhī-ḥi ।

मधु॒ नक्तमु॒तोषसि॒ मधुंम॒त्पार्थिंव॒ꣳ रजंः ।

madhu nak’tamutōṣhasi
madhumat’pār’thivagm’ rajaḥa ।

www.Sri Veda.net

मधु द्यौरस्तु नः पिता ।
madhud' dyauras'tu na[fp]' pitā I

मधुं मान्नो वनस्पतिर्मधुंमाꣳ , अस्तु सूर्यः ।
madhu mān'nō
vanas'patir'madhumāgm' , as'tu sūr'yaḥa I

माध्वीर्गावों भवन्तु नः ।
mādh'vīr'gāvō bhavan'tu naḥa I

य , इमं त्रिसुपर्णमयांचितं ब्राम्हणाय दद्यात् ।
ya , iman' trisupar'ṇamayāchitam'
brām'haṇāya dad'yā-te I

भ्रूणहत्यां वा , एते घ्नन्ति ।
bhrūṇahat'yāṁ' vā , ēteg' ghnan'ti I

ये ब्राम्हणास्त्रिसुपर्णं पठन्ति ।
yēb' brāām'haṇās'trisupar'ṇam' paṭhan'ti I

ते सोमं प्राप्नुवन्ति ।
tē sōmam' prāp'nuvan'ti I

आसहस्रात्पङ्क्तिं पुनन्ति । ॐ ॥ ५७ ॥ ॥ ३९ ॥
āsahas'rāt'paṅ'ktim' punan'ti I ōm II 57 II II 39 II

www.Sai Veda.net

[१०-४०-१]   [10-40-1]

ब्रम्हं मेधवाँ ।

bram'ha mēdhavāā ।

मधुं मेधवाँ ।

madhu mēdhavāā ।

ब्रम्हंमेव मधुं मेधवाँ ।

bram'hamēva madhu mēdhavāā ।

ब्रम्हा देवानाँ पद्वीः कवीनामृषिर्विप्राणां महिषो मृगाणाँम् ।

bram'hā dēvānāām' padavī[hk]'
kavīnāmṛṣhir'vip'rāṇām' mahiṣhō mṛgāṇāām ।

श्येनो गृद्ध्राणाङ्ग स्वधितिर्वनानाङ्ग सोमः पवित्रमत्येति रेभन्न् ।

śhyēnō gṛd'dhrāṇāges' svadhitir'vanānāgm'
sōma[fp]' pavit'ramat'yēti rēbhan'ne ।

हङ्गसश्शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।

hagm'saśh'śhuchiṣhad'vasuran'tarik'ṣhasad'dhōtā
vēdiṣhadatithir'durōṇasate ।

नृषद्वरसदृतसद्व्योमसदब्जा गोजा , ऋतजा , अद्रिजा , ऋतं बृहत् ।

nṛṣhad'varasadṛtasad'vyōmasadab'jā gōjā ,
ṛtajā , ad'rijā , ṛtam' bṛhate ।



www.SriVeda.net

ऋ॒चे त्वा॑ रु॒चे त्वा॒ समित्स्र॑वन्ति स॒रितो॒ न धेना॑ः ।

ṛchēt' tvā ruchēt' tvā samit'sravan'ti saritō
na dhēnāāḥa ।

अ॒न्तर्हृ॒दा मन॑सा पू॒यमा॑नाः ।

an'tar'hṛdā manasā pūyamānā-ḥa ।

घृ॒तस्य॒ धारा॑ , अ॒भिचा॑कशीमि ।

ghṛtas'ya dhārā , abhichākaśhīmi ।

हि॒र॒ण्ययो॑ वे॒त॒सो मद्ध्य॑ , आसाम् ।

hiraṇ'yayō vētasō mad'dhya , āsām ।

तस्मि॑न्त्सुप॒र्णो म॑धु॒कृत्कु॑ला॒यी भज॑न्नास्ते॒ मधु॑ दे॒वता॑भ्यः ।

tas'min'n'tsupar'ṇō madhukṛt'kulāyī
bhajan'nās'tē madhu dēvatāābh'yaḥa ।

तस्या॑सते॒ हर॑यस्स॒प्त तीरे॑ स्व॒धां दु॒हा॑ना , अ॒मृत॑स्य॒ धारा॑म् ।

tas'yāsatē harayas'sap'ta tīrēēs' svadhān' duhānā ,
amṛtas'ya dhārāām ।

य , इ॒दं त्रि॒सु॑प॒र्णम॒या॑चितं ब्राम्ह॒णाय॑ दद्यात् ।

ya , idan' trisupar'ṇamayāchitam'
brām'haṇāya dad'yā-te ।

वी॒रह॒त्यां वा , ए॒ते घ्नन्ति ।

vīrahat'yāṁ' vā , ētēg' ghnan'ti ।

www.sai.Veda.net

ये ब्राँम्हणास्त्रिसुपर्णं पठन्ति ।
yēb' brāām'haṇās'trisupar'ṇam' paṭhan'ti ।

ते सोमं प्राप्नुवन्ति ।
tē sōmam' prāp'nuvan'ti ।

आसहस्रात्पङ्क्तिं पुनन्ति । ॐ ॥ ५८ ॥ ॥ ४० ॥
āsahas'rāt'paṅ'ktim' punan'ti । ōm ॥ 58 ॥ ॥ 40 ॥

[१०-४१-१]   [10-41-1]

मेधा देवी जुषमाणा न , आगाँद्विश्वाची भद्रा सुमनस्यमाना ।
mēdhā dēvī juṣhamāṇā na , āgāād'viśh'vāchī
bhad'rā sumanas'yamāṇā ।

त्वया जुष्टा नुदमाणा दुरुक्ताँन्बृहद्वदेम विदथे सुवीराँः ।
tvayā juṣh'ṭā nudamāṇā duruk'tāān'bṛhad'vadēma
vidathē suvīrāāḥa ।

त्वया जुष्ट , ऋषिर्भवति देवि त्वया ब्रम्हा गतश्रीरुत त्वयाँ ।
tvayā juṣh'ṭa , ṛṣhir'bhavati dēvit' tvayāb'
bram'hā gataśh'rīrutat' tvayāā ।

त्वया जुष्टश्चित्रं विन्दते वसु सा नो
जुषस्व द्रविणो न मेधे ॥ ५९ ॥ ॥ ४१ ॥
tvayā juṣh'ṭaśh'chit'raṁ' vin'datē vasu sā nō
juṣhas'vad' draviṇō na mēdhē ॥ 59 ॥ ॥ 41 ॥

www.SaiVeda.net

[१०-४२-१]   [10-42-1]

मेधां म , इन्द्रो ददातु मेधां देवी सरस्वती ।

mēdhām’ ma , in’drō dadātu mēdhān’ dēvī saras’vatī ।

मेधां मे , अश्विनावुभावाधत्तां पुष्करस्रजा ।

mēdhām’ mē , aśh’vināvubhāvādhat’tām’
pușh’karas’rajā ।

अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः ।

ap’sarāsu cha yā mēdhā
gan’dhar’vēșhu cha yan’manaḥa ।

दैवीं मेधा सरस्वती स मां मेधा
सुरभिर्जुषताꣳ स्वाहा ॥ ६० ॥ ॥ ४२ ॥

daivīim’ mēdhā saras’vatī sa māām’ mēdhā
surabhir’jușhatāges’ svāhāā ॥ 60 ॥ ॥ 42 ॥

[१०-४३-१]   [10-43-1]

आ मां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या ।

ā māām’ mēdhā surabhir’viśh’varūpā
hiraṇ’yavar’ṇā jagatī jagam’yā ।

ऊर्जस्वती पयसा पिन्वमाना सा मां
मेधा सुप्रतीका जुषन्ताम् ॥ ६१ ॥ ॥ ४३ ॥

ūr’jas’vatī payasā pin’vamānā sā māām’
mēdhā sup’ratīkā jușhan’tām ॥ 61 ॥ ॥ 43 ॥

www.saiveda.net

[१०-४४-१] [10-44-1]

मयि॑ मे॒धां मयि॑ प्र॒जां मय्य॒ग्निस्तेजो॑ दधातु मयि॑ मे॒धां
मयि॑ प्र॒जां मयीन्द्र॑ , इन्द्रि॒यं द॑धातु मयि॑ मे॒धां मयि॑ प्र॒जां
मयि॒ सूर्यो॒ भ्राजो॑ दधातु ॥ ६२ ॥ ॥ ४४ ॥

mayi mēdhām' mayip' prajām' may'yag'nis'tējō
dadhātu mayi mēdhām' mayip' prajām'
mayīn'dra , in'driyan' dadhātu
mayi mēdhām' mayip' prajām'
mayi sūr'yōb' bhrājō dadhātu ॥ 62 ॥ ॥ 44 ॥

[१०-४५-१] [10-45-1]

अपै॑तु मृत्युर॒मृतं॑ न॒ , आग॑न्वैवस्व॒तो नो॒ , अभ॑यं कृणोतु ।
apaitu mṛt'yuramṛtan' na , āgan'vaivas'vatō nō ,
abhayaṅ' kṛṇōtu ।

प॒र्णं व॒नस्पते॑रिवा॒भि न॑श्शीयता॒ᳪं॒
र॒यिस्सच॑तां न॒श्शची॒पति॑ः ॥ ६३ ॥ ॥ ४५ ॥

par'ṇaṁ' vanas'patērivābhi naś́h'ś́hīyatāgm'
rayis'sachatān' naś́h'ś́hachīpatiḥi ॥ 63 ॥ ॥ 45 ॥

[१०-४६-१] [10-46-1]

परं॑ मृत्यो॒ , अनु॒ परे॑हि॒ पन्थां॒ यस्ते॒ स्व , इत॑रो दे॒वयाना॑त् ।
param' mṛt'yō , anu parēhi pan'thāñ' yas'tēs' sva ,
itarō dēvayānāāte ।

चक्षु॑ष्मते शृण्व॒ते ते॑ ब्रवीमि मा नः॑

प्र॒जाꣳ री॑रिषो॒ मोत वी॒रान् ॥ ६४ ॥ ॥ ४६ ॥

chak’ṣhuṣh’matē śhṛṇ’vatē tēēb’ bravīmi mā na[fp]’

prajāgm’ rīriṣhō mōta vīrā-ne || 64 || || 46 ||

[१०-४७-१] [10-47-1]

वातं॑ प्रा॒णं मन॑सा॒ऽन्वार॑भामहे प्र॒जाप॑तिं॒ यो भुव॑नस्य गो॒पाः ।

vātam’ prāṇam’ manasā (a)n’vārabhāmahēp’

prajāpatiñ’ yō bhuvanas’ya gōpā-ḥa |

स नो॑ मृ॒त्योस्त्रा॑यतां॒ पात्वꣳह॑सो॒

ज्योग्जी॒वा ज॒राम॑शीमहि ॥ ६५ ॥ ॥ ४७ ॥

sa nō mṛt’yōs’trāyatām’ pāt’vagm’hasōj’ jyōg’jīvā

jarāmaśhīmahi || 65 || || 47 ||

[१०-४८-१] [10-48-1]

अ॒मु॒त्र॒भू॒याद॒ध य॒द्यम॒स्य॒ बृह॑स्पते , अ॒भिश॑स्ते॒रमुं॑ञ्चः ।

amut’rabhūyādadha yad’yamas’ya bṛhas’patē ,

abhiśhas’tēramuñ’chaḥa |

प्रत्यौ॑हताम॒श्विना॑ मृ॒त्युम॑स्माद्दे॒वाना॑मग्ने

भि॒षजा॒ शची॑भिः ॥ ६६ ॥ ॥ ४८ ॥

prat’yauhatāmaśh’vinā mṛt’yumas’mād’dēvānāmag’nē

bhiṣhajā śhachībhiḥi || 66 || || 48 ||

www.sanvedanet

[१०-४९-१]   [10-49-1]

हरिँ॒ हर॑न्तमनु॒यन्ति दे॒वा विश्व॒स्येशा॑नं वृष॒भं म॒तीना॑म् ।

harigm’ haran’tamanuyan’ti dēvā

viśh’vas’yēśhānam’ vṛṣhabham’ matīnām ।

ब्रम्ह॒ सरू॑पमनु॒ मे॒दमागा॒दय॑नं॒ मा विव॑धी॒र्विक्र॑मस्व ॥ ६७ ॥ ॥ ४९ ॥

bram’ha sarūpamanu mēdamāgādayanam’ mā

vivadhīr’vik’ramas’va ॥ 67 ॥ ॥ 49 ॥

[१०-५०-१]   [10-50-1]

शल्कै॑रग्निमि॑न्धा॒न , उ॒भौ लो॒कौ सं॑नेम॒हम् ।

śhal’kairag’nimin’dhāna , ubhau lōkau sanēmaham ।

उ॒भयो॑र्लो॒कयो॑र्ऋ॒ध्वाऽति॑ मृ॒त्युं त॑राम्य॒हम् ॥ ६८ ॥ ॥ ५० ॥

ubhayōōr’lōkayōr’ṛdh’vā (a)ti mṛt’yun’

tarām’yaham ॥ 68 ॥ ॥ 50 ॥

[१०-५१-१]   [10-51-1]

मा छि॑दो मृत्यो॒ मा व॑धी॒र्मा मे॒ बलं॒ विवृ॑हो॒ मा प्रमो॑षीः ।

mā chhidō mṛt’yō mā vadhīr’mā mē

balam’ vivṛhō māp’ pramōṣhī-ḥi ।

प्र॒जां मा मे॑ रीरिष॒ ,

आयु॑रुग्र नृ॒चक्ष॑सं त्वा ह॒विषा॑ विधेम ॥ ६९ ॥ ॥ ५१ ॥

prajām’ mā mē rīriṣha , āyurug’ra nṛchak’ṣhasan’ tvā

haviṣhā vidhēma ॥ 69 ॥ ॥ 51 ॥

[१०-५२-१]   [10-52-1]

मा नो॑ म॒हान्त॑मु॒त मा नो॑ , अर्भ॒कं मा न॒ , उक्ष॑न्तमु॒त मा न॑ , उ॒क्षि॒तम् ।

mā nō mahān'tamuta mā nō , ar'bhakam' mā na ,
uk'ṣhan'tamuta mā na , uk'ṣhitam ।

मा नो॑ वधीः पि॒तरं॒ मोत मा॒तरं॑ प्रि॒या मा
नस्त॒नुवो॑ रुद्र रीरिषः ॥ ७० ॥ ॥ ५२ ॥

mā nō vadhī[fp]' pitaram' mōta mātaram' priyā mā
nas'tanuvō rud'ra rīriṣhaḥa ॥ 70 ॥ ॥ 52 ॥

[१०-५३-१]   [10-53-1]

मा न॑स्तो॒के तन॑ये॒ मा न॒ , आयु॑षि॒ मा नो॒ गोषु॒ मा नो॒ , अश्वे॑षु रीरिषः ।

mā nas'tōkē tanayē mā na , āyuṣhi mā nō
gōṣhu mā nō , aśh'vēṣhu rīriṣhaḥa ।

वी॒रान्मा नो॑ रुद्र भामि॒तो व॑धीर्ह॒विष्म॑न्तो॒
नम॑सा विधेम ते ॥ ७१ ॥ ॥ ५३ ॥

vīrān'mā nō rud'ra bhāmitō vadhīr'haviṣh'man'tō
namasā vidhēma tē ॥ 71 ॥ ॥ 53 ॥

[१०-५४-१]   [10-54-1]

प्र॒जा॑पते॒ न त्वदे॒तान्य॒न्यो विश्वा॑ जा॒ता॒नि॒ परि॒ ता ब॑भूव ।

prajāpatē nat' tvadētān'yan'yō viśh'vā
jātāni pari tā babhūva ।

www.saiveda.net

यत्कामास्ते जुहुमस्तन्नो ,

अस्तु वयङ्ग् स्याम पतयो रयीणाम् ॥ ७२ ॥ ॥ ५४ ॥

yat’kāmās’tē juhumas’tan’nō , as’tu vayag’ges’ syāma

patayō rayīṇām || 72 || || 54 ||

[१०-५५-१] [10-55-1]

स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी ।

svas’tidā viśhas’patir’vṛt’rahā vimṛdhō vaśhī |

वृषेन्द्रः पुर , एतु नस्स्वस्तिदा , अभयंकरः ॥ ७३ ॥ ॥ ५५ ॥

vṛṣhēn’dra[fp]’ pura , ētu nas’svas’tidā ,

abhayaṅ’karaḥa || 73 || || 55 ||

[१०-५६-१] [10-56-1]

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।

tryam’bakañ’ yajāmahē sugan’dhim’

puṣh’tivar’dhanam |

उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥ ७४ ॥ ॥ ५६ ॥

ur’vārukamiva ban’dhanān’mṛt’yōr’

muk’ṣhīya mā (a)mṛtāāte || 74 || || 56 ||

[१०-५७-१] [10-57-1]

ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे ।

yē tē sahas’ramayutam’ pāśhā

mṛt’yō mar’tyāya han’tavē |

तान्-यज्ञस्य मायया सर्वानवयजामहे ॥ ७५ ॥ ॥ ५७ ॥

tā-ne yaj'ñas'ya māyayā
sar'vānavayajāmahē ॥ 75 ॥ ॥ 57 ॥

[१०-५८-१] [10-58-1]

मृत्यवे स्वाहा मृत्यवे स्वाहा ॥ ७६ ॥ ॥ ५८ ॥

mṛt'yavēs' svāhā mṛt'yavēs' svāhāā ॥ 76 ॥ ॥ 58 ॥

[१०-५९-१] [10-59-1]

देवकृतस्यैनसोऽवयजनमसि स्वाहा ।

dēvakṛtas'yainasō (a)vayajanamasis' svāhāā ।

मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा ।

manuṣh'yakṛtas'yainasō (a)vayajanamasis' svāhāā ।

पितृकृतस्यैनसोऽवयजनमसि स्वाहा ।

pitṛkṛtas'yainasō (a)vayajanamasis' svāhāā ।

आत्मकृतस्यैनसोऽवयजनमसि स्वाहा ।

āt'makṛtas'yainasō (a)vayajanamasis' svāhāā ।

अन्यकृतस्यैनसोऽवयजनमसि स्वाहा ।

an'yakṛtas'yainasō (a)vayajanamasis' svāhāā ।

अस्मत्कृतस्यैनसोऽवयजनमसि स्वाहा ।

as'mat'kṛtas'yainasō (a)vayajanamasis' svāhāā ।

www.SaiVeda.net

यद्दिवा च नक्तं चैनंश्चकृम तस्यावयजनमसि स्वाहा ।
yad’divā cha nak’tañ’
chainaśh’chakṛma tas’yāvayajanamasis’ svāhāā ।

यत्स्वपन्तंश्च जाग्रंतश्चैनंश्चकृम तस्यावयजनमसि स्वाहा ।
yat’svapan’taśh’cha jāg’rataśh’chainaśh’chakṛma
tas’yāvayajanamasis’ svāhāā ।

यत्सुषुप्तंश्च जाग्रंतश्चैनंश्चकृम तस्यावयजनमसि स्वाहा ।
yat’suṣhup’taśh’cha jāg’rataśh’chainaśh’chakṛma
tas’yāvayajanamasis’ svāhāā ।

यद्विद्वाꣳसश्चाविंद्वाꣳसश्चैनंश्चकृम तस्यावयजनमसि स्वाहा ।
yad’vid’vāgm’saśh’chāvid’vāgm’saśh’chainaśh’
chakṛma tas’yāvayajanamasis’ svāhāā ।

एनस , एनसोऽवयजनमसि स्वाहा ॥ ७७ ॥ ॥ ५९ ॥
ēnasa , ēnasō (a)vayajanamasis’ svāhā ॥ 77 ॥ ॥ 59 ॥

[१०-६०-१] [10-60-1]

यद्वो देवाश्चकृम जिह्वया गुरु मनसो वा प्रयुती देवहेडनम् ।
yad’vō dēvāśh’chakṛma jih’vayā guru manasō
vāp’ prayutī dēvahēḍanam ।

अरा वायो नो , अभि दुच्छुनायते तस्मिन्तदेनो
वसवो निधेतन स्वाहा ॥ ७८ ॥ ॥ ६० ॥
arā vāyō nō , abhi dut’chhunāyatē tas’min’tadēnō
vasavō nidhētanas’ svāhāā ॥ 78 ॥ ॥ 60 ॥

[१०-६१-१]   [10-61-1]

कामोऽकार्षीँन्नमो॒ नमः ।

kāmō (a)kār'ṣhīīn'namō namaḥa ।

कामोऽकार्षीत्कामः करोति नाहं करोमि कामः कर्ता
नाहं कर्ता कामः कार॒यिता नाहं कार॒यिता ,
एष ते काम कामाय स्वा॒हा ॥ ७९ ॥ ॥ ६१ ॥

kāmō (a)kār'ṣhīt'kāma[hk]' karōti nāhaṅ' karōmi
kāma[hk]' kar'tā nāhaṅ' kar'tā kāma[hk]'
kārayitā nāhaṅ' kārayitā , ēṣha tē kāma
kāmāyas' svāhā ॥ 79 ॥ ॥ 61 ॥

[१०-६२-१]   [10-62-1]

मन्युरकार्॒षीँन्नमो॒ नमः ।

man'yurakār'ṣhīīn'namō namaḥa ।

मन्युरकार्॒षीन्मन्युः करोति नाहं करोमि मन्युः कर्ता
नाहं कर्ता मन्युः कार॒यिता नाहं कार॒यिता ,
एष ते मन्यो मन्यवे स्वा॒हा ॥ ८० ॥ ॥ ६२ ॥

man'yurakār'ṣhīn'man'yu[hk]' karōti nāhaṅ'
karōmi man'yu[hk]' kar'tā nāhaṅ' kar'tā
man'yu[hk]' kārayitā nāhaṅ' kārayitā ,
ēṣha tē man'yō man'yavēs' svāhā ॥ 80 ॥ ॥ 62 ॥

[१०-६३-१ ] [10-63-1 ]

तिलाञ्जुहोमि सरसाꣳ सपिष्टान्गन्धार मम चित्ते रमन्तु स्वाहा ॥
tilāñ'juhōmi sarasāgm' sapiṣh'ṭān'gan'dhāra mama
chit'tē raman'tus' svāhā ||

गावो हिरण्यं धनमन्नपानꣳ सर्वेषाꣳ श्रियै स्वाहा ॥
gāvō hiraṇ'yan' dhanaman'napānagm'
sar'vēṣhāgeśh' śhriyais' svāhā ||

श्रियं च लक्ष्मिं च पुष्टिं च कीर्तिं चाऽऽनृण्यताम् ।
śhriyañ' cha lak'ṣhmiñ' cha puṣh'ṭiñ' cha kīr'tiñ'
chā (ā)nṛṇ'yatām |

ब्रम्हण्यं बहुपुत्रताम् ।
bram'haṇ'yam' bahuput'ratām |

श्रद्धामेधे प्रजास्संददातु स्वाहा ॥ ८१ ॥ ॥ ६३ ॥
śhrad'dhāmēdhēp'
prajās'san'dadātus' svāhā || 81 || || 63 ||

[१०-६४-१] [10-64-1]

तिलाः कृष्णास्तिलाश्श्वेतास्तिलास्सौम्या वशानुगाः ।
tilā[hk]' kṛṣh'ṇās'tilāśh'śhvētās'tilās'saum'yā
vaśhānugā-ḥa |

तिलाः पुनन्तु मे पापं यत्किञ्चिद्दुरितं मयि स्वाहा ॥
tilā[fp]' punan'tu mē pāpañ'
yat'kiñ'chid'duritam' mayis' svāhā ||

चोरस्यान्नं नवश्राद्धं ब्रम्हहा गुरुतल्पगः ।
chōras’yān’nan’ navaśh’rād’dham’
bram’hahā gurutal’pagaḥa ।

गोस्तेयꣳ सुरापानं भ्रूणहत्या तिला शान्तिꣳ शमयन्तु स्वाहा ॥
gōs’tēyagm’ surāpānam’ bhrūṇahat’yā tilā
śhān’tigm’ śhamayan’tus’ svāhā ॥

श्रीश्च लक्ष्मीश्च पुष्टीश्च कीर्तिं चाऽऽनृण्यताम् ।
śhrīśh’cha lak’ṣhmīśh’cha puṣh’ṭīśh’cha kīr’tiñ’
chā (ā)nṛṇ’yatām ।

ब्रम्हण्यं बहुपुत्रताम् ।
bram’haṇ’yam’ bahuput’ratām ।

श्रद्धामेधे प्रज्ञा तु जातवेदस्संददातु स्वाहा ॥ ८२ ॥ ॥ ६४ ॥
śhrad’dhāmēdhēp’ praj’ñā
tu jātavēdas’san’dadātus’ svāhā ॥ 82 ॥ ॥ 64 ॥

[१०-६५-१] [10-65-1]

प्राणापानव्यानोदानसमाना मे शुध्यन्तां ज्योतिरहं
विरजा विपाप्मा भूयासꣳ स्वाहा ।
prāṇāpānav’yānōdānasamānā mē
śhudh’yan’tāñ’ jyōtirahaṁ’ virajā
vipāp’mā bhūyāsag’ges’ svāhāā ।

www.sai veda.net

वाङ्मनश्चक्षुश्श्रोत्रजिह्वाघ्राणरेतो बुद्ध्याकूतिस्संकल्पा मे॑ शुध्य॒न्तां॒
ज्योति॑र॒हं वि॒रजा॑ विपा॒प्मा भू॑यास॒ग्ं॒ स्वाहा॓ ।

vāṅ'manaśh'chak'ṣhuśh'śhrōt'rajih'vāgh'rāṇaretō
bud'dhyākūtis'saṅ'kal'pā mē
śhudh'yan'tāñ' jyōtiraham' virajā
vipāp'mā bhūyāsag'ges' svāhāā |

त्वक्चर्ममाꣳसरुधिरमेदोमज्जास्नायवोऽस्थीनि मे॑ शुध्य॒न्तां॒
ज्योति॑र॒हं वि॒रजा॑ विपा॒प्मा भू॑यास॒ग्ं॒ स्वाहा॓ ।

tvak'char'mamāgm'sarudhiramedōmaj'jās'nāyavō
(a)s'thīni mē śhudh'yan'tāñ' jyōtiraham'
virajā vipāp'mā bhūyāsag'ges' svāhāā |

शिरःपाणिपादपार्श्वपृष्ठोरूदरजङ्घशिश्नोपस्थपायवो मे॑ शुध्य॒न्तां॒
ज्योति॑र॒हं वि॒रजा॑ विपा॒प्मा भू॑यास॒ग्ं॒ स्वाहा॓ ।

śhira[fp]'pāṇipādapār'śhvapṛṣh'ṭhōrūdarajaṅ'ghaśhiśh'
nōpas'thapāyavō mē śhudh'yan'tāñ' jyōtiraham'
virajā vipāp'mā bhūyāsag'ges' svāhāā |

उत्तिष्ठ पुरुष हरित पिङ्गल लोहिताक्षि देहि देहि ददापयिता मे॑ शुध्य॒न्तां॒
ज्योति॑र॒हं वि॒रजा॑ विपा॒प्मा भू॑यास॒ग्ं॒ स्वाहा॓ ॥ ८३ ॥ ॥ ६५ ॥

ut'tiṣh'ṭha puruṣha harita piṅ'gala lōhitāk'ṣhi dēhi
dēhi dadāpayitā mē śhudh'yan'tāñ'
jyōtiraham' virajā vipāp'mā
bhūyāsag'ges' svāhāā || 83 || || 65 ||

[१०-६६-१]   [10-66-1]

पृथिव्यापस्तेजो वायुराकाशा मे शुध्यन्तां ज्योतिरहं विरजा
विपाप्मा भूयासꣳ स्वाहा ।

pṛthiv'yāpas'tējō vāyurākāśhā mē
śhudh'yan'tāñ' jyōtiraham' virajā
vipāp'mā bhūyāsag'ges' svāhāā ।

शब्दस्पर्शरूपरसगन्धा मे शुध्यन्तां ज्योतिरहं विरजा
विपाप्मा भूयासꣳ स्वाहा ।

śhab'das'par'śharūparasagan'dhā mē
śhudh'yan'tāñ' jyōtiraham' virajā
vipāp'mā bhūyāsag'ges' svāhāā ।

मनोवाक्कायकर्माणि मे शुध्यन्तां ज्योतिरहं
विरजा विपाप्मा भूयासꣳ स्वाहा ।

manōvāk'kāyakar'māṇi mē śhudh'yan'tāñ' jyōtiraham'
virajā vipāp'mā bhūyāsag'ges' svāhāā ।

अव्यक्तभावैरहंकारैर्ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा ।

av'yak'tabhāvairahan'kārair'jyōtiraham' virajā
vipāp'mā bhūyāsag'ges' svāhāā ।

आत्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा ।

āt'mā mē śhudh'yan'tāñ' jyōtiraham' virajā
vipāp'mā bhūyāsag'ges' svāhāā ।

अन्तरात्मा मे॑ शुध्य॒न्तां॒ ज्योति॑र॒हं वि॒रजा॑ विपा॒प्मा भू॑यास॒ग्ं॒ स्वाहा᳚ ।

an’tarāt’mā mē śhudh’yan’tāñ’ jyōtiraham’ virajā
vipāp’mā bhūyāsag’ges’ svāhāā ।

परमात्मा मे॑ शुध्य॒न्तां॒ ज्योति॑र॒हं वि॒रजा॑ विपा॒प्मा भू॑यास॒ग्ं॒ स्वाहा᳚ ।

paramāt’mā mē śhudh’yan’tāñ’ jyōtiraham’ virajā
vipāp’mā bhūyāsag’ges’ svāhāā ।

क्षु॒धे स्वाहा᳚ ।

kṣhudhēs’ svāhāā ।

क्षुत्पि॑पासाय॒ स्वाहा᳚ ।

kṣhut’pipāsāyas’ svāhāā ।

विवि॑ट्ट्यै स्वाहा᳚ ।

viviṭ’ṭyais’ svāhāā ।

ऋग्वि॑धानाय॒ स्वाहा᳚ ।

ṛg’vidhānāyas’ svāhāā ।

क॒षो᳚त्काय॒ स्वाहा᳚ ।

kaṣhōōt’kāyas’ svāhāā ।

क्षु॒त्पि॒पा॒साम॑लं ज्ये॒ष्ठा॒म॒ल॒क्ष्मीर्ना॑शया॒म्यह॒म् ।

kṣhut’pipāsāmalañ’
jyēṣh’ṭhāmalak’ṣhmīr’nāśhayām’yaham ।

www.SaiVeda.net

अभूतिमसंमृद्धिं च सर्वान्निर्णुद मे पाप्मानङ्ग् स्वाहा ।
abhūtimasamṛd'dhiñ' cha sar'vān'nir'ṇuda mē
pāp'mānag'ges' svāhā |

अन्नमयप्राणमयमनोमयविज्ञानमयमानन्दमयमात्मा मे शुध्यन्तां
ज्योतिरहं विरजा विपाप्मा भूयासङ्ग् स्वाहा ॥ ८४ ॥ ॥ ६६ ॥
an'namayap'rāṇamayamanōmaya
vij'ñānamayamānan'damayamāt'mā mē
śhudh'yan'tāñ' jyōtirahaṁ' virajā vipāp'mā
bhūyāsag'ges' svāhāā || 84 || || 66 ||

[१०-६७-१] [10-67-1]

अग्नये स्वाहा ।
ag'nayēs' svāhāā |

विश्वेभ्यो देवेभ्यस्स्वाहा ।
viśh'vēēbh'yō dēvēbh'yas'svāhāā |

ध्रुवाय भूमाय स्वाहा ।
dhruvāya bhūmāyas' svāhāā |

ध्रुवक्षितये स्वाहा ।
dhruvak'ṣhitayēs' svāhāā |

अच्युतक्षितये स्वाहा ।
ach'yutak'ṣhitayēs' svāhāā |

www.Sai Veda.net

अ॒ग्नये॑ स्वि॒ष्ट॒कृ॒ते स्वाहा॑ ।

ag’nayēēs’ sviṣh’ṭakṛtēs’ svāhāā |

धर्मा॑य॒ स्वाहा॑ ।

dhar’māyas’ svāhāā |

अधर्मा॑य॒ स्वाहा॑ ।

adhar’māyas’ svāhāā |

अ॒द्भ्यस्स्वाहा॑ ।

ad’bhyas’svāhāā |

ओ॒ष॒धि॒व॒न॒स्प॒तिभ्य॒ः स्वाहा॑ ॥ ८५ ॥

ōṣhadhivanas’patibh’yas’ svāhāā || 85 ||

[१०-६७-२] [10-67-2]

र॒क्षो॒दे॒व॒ज॒नेभ्य॒स्स्वाहा॑ ।

rak’ṣhōdēvajanēbh’yas’svāhāā |

गृह्या॑भ्य॒स्स्वाहा॑ ।

gṛh’yāābh’yas’svāhāā |

अ॒व॒साने॑भ्य॒स्स्वाहा॑ ।

avasānēēbh’yas’svāhāā |

अ॒व॒सान॑पतिभ्य॒स्स्वाहा॑ ।

avasānapatibh’yas’svāhāā |

www.Sai Veda.net

स॒र्व॒भू॒तेभ्य॒स्स्वाहा᳚ ।

sar’vabhūtēbh’yas’svāhāā |

कामा॑य॒ स्वाहा᳚ ।

kāmāyas’ svāhāā |

अ॒न्तरि॑क्षाय॒ स्वाहा᳚ ।

an’tarik’ṣhāyas’ svāhāā |

यदेज॑ति॒ जग॑ति॒ यच्च॒ चेष्ट॑ति॒ नाम्नो᳚ भा॒गोऽयं नाम्ने॒ स्वाहा᳚ ।

yadējati jagati yat’cha chēṣh’ṭati nām’nō
bhāgō (a)yan’ nām’nēs’ svāhāā |

पृ॒थि॒व्यै स्वाहा᳚ ।

pṛthiv’yais’ svāhāā |

अ॒न्तरि॑क्षाय॒ स्वाहा᳚ ॥ ८६ ॥

an’tarik’ṣhāyas’ svāhāā || 86 ||

[१०-६७-३] [10-67-3]

दि॒वे स्वाहा᳚ ।

divēs’ svāhāā |

सूर्या॑य॒ स्वाहा᳚ ।

sūr’yāyas’ svāhāā |

च॒न्द्रम॑से॒ स्वाहा᳚ ।

chan’dramasēs’ svāhāā |

www.SaiVeda.net

नक्ष॑त्रेभ्य॒स्स्वाहा᳚ ।

nak’ṣhat’rēbh’yas’svāhāā ।

इन्द्रा॑य॒ स्वाहा᳚ ।

in’drāyas’ svāhāā ।

बृ॒हस्पत॑ये॒ स्वाहा᳚ ।

bṛhas’patayēs’ svāhāā ।

प्र॒जाप॑तये॒ स्वाहा᳚ ।

prajāpatayēs’ svāhāā ।

ब्रम्ह॑णे॒ स्वाहा᳚ ।

bram’hanēs’ svāhāā ।

स्व॒धा पि॒तृभ्य॒स्स्वाहा᳚ ।

svadhā pitṛbh’yas’svāhāā ।

नमो॑ रु॒द्राय॑ पशु॒पत॑ये॒ स्वाहा᳚ ॥ ८७ ॥

namō rud’rāya paśhupatayēs’ svāhāā ॥ 87 ॥

[१०-६७-४]   [10-67-4]

दे॒वेभ्य॒स्स्वाहा᳚ ।

dēvēbh’yas’svāhāā ।

पि॒तृभ्य॑स्स्व॒धाऽस्तु॑ ।

pitṛbh’yas’svadhā (a)s’tu ।

भूतेभ्यो नमः ।
bhūtēbh'yō namaḥa ।

मनुष्येभ्यो हन्ता ।
manuṣh'yēēbh'yō han'tāā ।

प्रजापतये स्वाहा ।
prajāpatayēs' svāhāā ।

परमेष्ठिने स्वाहा ।
paramēṣh'ṭhinēs' svāhāā ।

यथा कूपश्शतधारस्सहस्रधारो , अक्षितः ।
yathā kūpaśh'śhatadhāras'sahas'radhārō , ak'ṣhitaḥa ।

एवा मे , अस्तु धान्यꣳ सहस्रधारमक्षितम् ।
ēvā mē , as'tu dhān'yagm' sahas'radhāramak'ṣhitam ।

धनधान्यै स्वाहा ।
dhanadhān'yais' svāhāā ।

ये भूताः प्रचरन्ति दिवानक्तं बलिमिच्छन्तो वितुदस्य प्रेष्याः ।
yē bhūtā[fp]' pracharan'ti divānak'tam'
balimit'chhan'tō vitudas'yap' prēṣh'yāāḥa ।

तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिर्दधातु स्वाहा ॥ ८८ ॥
tēbh'yō balim' puṣh'ṭikāmō harāmi mayi puṣh'ṭim'
puṣh'ṭipatir'dadhātus' svāhāā ॥ 88 ॥

www.SaiVeda.net

ओषधिवनस्पतिभ्यस्स्वाहाऽन्तरिक्षाय स्वाहा नमो रुद्राय पशुपतये स्वाहा
वितुदस्य प्रेष्या , एकं च ॥ ६७ ॥

ōṣhadhivanas'patibh'yas'svāhā (a)n'tarik'ṣhāyas' svāhā
namō rud'rāya paśhupatayēs' svāhā
vitudas'yap' prēṣh'yā , ēkañ' cha ॥ 67 ॥

[१०-६८-१]   [10-68-1]

ओं तद्ब्रम्ह ।

ōōn' tad'bram'ha ।

ओं तद्वायुः ।

ōōn' tad'vāyuḥu ।

ओं तदात्मा ।

ōōn' tadāt'mā ।

ओं तत्सत्यम् ।

ōōn' tat'sat'yam ।

ओं तत्सर्वम् ।

ōōn' tat'sar'vam'm ।

ओं तत्पुरोर्नमः ।

ōōn' tat'purōr'namaḥa ।

अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु ।
an'taśh'charati bhūtēṣhu guhāyāṁ' viśh'vamūr'tiṣhu ।

www.Sai Veda net

त्वं यज्ञस्त्वं वषड्कारस्त्वमिन्द्रस्त्वꣳ रुद्रस्त्वं विष्णुस्त्वं ब्रम्ह त्वं प्रजापतिः ।
tvañ’ yaj’ñas’tvaṁ’ vaṣhaṭ’kāras’tvamin’dras’tvagm’
rud’ras’tvaṁ’ viṣh’ṇus’tvam’
bram’hat’ tvam’ prajāpatiḥi ।

त्वं तदाप , आपो ज्योती रसोऽमृतं ब्रम्ह
भूर्भुवस्सुवरोम् ॥ ८९ ॥ ॥ ६८ ॥
tvan’ tadāpa , āpōj’ jyōtī rasō (a)mṛtam’ bram’ha
bhūr’bhuvas’suvarōm ॥ 89 ॥ ॥ 68 ॥

[१०-६९-१] [10-69-1]

श्रद्धायां प्राणे निविंष्टोऽमृतं जुहोमि ।
śhrad’dhāyāām’ prāṇē niviṣh’ṭō (a)mṛtañ’ juhōmi ।

श्रद्धायामपाने निविंष्टोऽमृतं जुहोमि ।
śhrad’dhāyāmapānē niviṣh’ṭō (a)mṛtañ’ juhōmi ।

श्रद्धायां व्याने निविंष्टोऽमृतं जुहोमि ।
śhrad’dhāyāaṁ’ vyānē niviṣh’ṭō (a)mṛtañ’ juhōmi ।

श्रद्धायामुदाने निविंष्टोऽमृतं जुहोमि ।
śhrad’dhāyāmudānē niviṣh’ṭō (a)mṛtañ’ juhōmi ।

श्रद्धायाꣳ समाने निविंष्टोऽमृतं जुहोमि ।
śhrad’dhāyāgm’ samānē niviṣh’ṭō (a)mṛtañ’ juhōmi ।

ब्रम्हंणि म , आत्माऽमृतत्वाय ।
bram’haṇi ma , āt’mā (a)mṛtat’vāya ।

अ॒मृ॒तो॒प॒स्त॒र॑णमसि ।

amṛtōpas’taraṇamasi ।

श्र॒द्धायां᳚ प्रा॒णे निवि॑ष्टो॒ऽमृतं॑ जुहोमि ।

śhrad’dhāyāām’ prāṇē niviṣh’tō (a)mṛtañ’ juhōmi ।

शि॒वो मा॑ वि॒शाप्र॑दाहाय ।

śhivō mā viśhāp’radāhāya ।

प्रा॒णाय॒ स्वाहा᳚ ।

prāṇāyas’ svāhāā ।

श्र॒द्धाया॑मपा॒ने निवि॑ष्टो॒ऽमृतं॑ जुहोमि ।

śhrad’dhāyāmapānē niviṣh’tō (a)mṛtañ’ juhōmi ।

शि॒वो मा॑ वि॒शाप्र॑दाहाय ।

śhivō mā viśhāp’radāhāya ।

अ॒पा॒नाय॒ स्वाहा᳚ ।

apānāyas’ svāhāā ।

श्र॒द्धायां᳚ व्या॒ने निवि॑ष्टो॒ऽमृतं॑ जुहोमि ।

śhrad’dhāyāāṁ’ vyānē niviṣh’tō (a)mṛtañ’ juhōmi ।

शि॒वो मा॑ वि॒शाप्र॑दाहाय ।

śhivō mā viśhāp’radāhāya ।

व्या॒नाय॒ स्वाहा᳚ ।

vyānāyas’ svāhāā ।

www.SaiVeda.net

श्र॒द्धाया॑मुदा॒ने निवि॑ष्टो॒ऽमृतं॑ जुहो॑मि ।

śhrad'dhāyāmudānē niviṣh'ṭō (a)mṛtañ' juhōmi |

शि॒वो मा॑ वि॒शाप्र॑दाहाय ।

śhivō mā viśhāp'radāhāya |

उ॒दा॒नाय॒ स्वाहा॑ ।

udānāyas' svāhāā |

श्र॒द्धाया॑ꣳ समा॒ने निवि॑ष्टो॒ऽमृतं॑ जुहो॑मि ।

śhrad'dhāyāgm' samānē niviṣh'ṭō (a)mṛtañ' juhōmi |

शि॒वो मा॑ वि॒शाप्र॑दाहाय ।

śhivō mā viśhāp'radāhāya |

स॒मा॒नाय॒ स्वाहा॑ ।

samānāyas' svāhāā |

ब्रम्ह॑णि म , आ॒त्माऽमृ॑त॒त्वाय॑ ।

bram'haṇi ma , āt'mā (a)mṛtat'vāya |

अ॒मृ॒ता॒पि॒धा॒नम॑सि ॥ ९० ॥ ॥ ६९ ॥

amṛtāpidhānamasi || 90 || || 69 ||

[१०-७०-१] [10-70-1]

श्र॒द्धाया॑ं प्रा॒णे निवि॑श्या॒मृत॑ꣳ हु॒तम् ।

śhrad'dhāyāām' prāṇē niviśh'yāmṛtagm' hutam |

www.Sai Veda.net

प्राणमन्नेनाप्यायस्व ।

prāṇaman'nēnāp'yāyas'va ।

श्रद्धायामपाने निविश्यामृतꣳ हुतम् ।

śhrad'dhāyāmapānē niviśh'yāmṛtagm' hutam ।

अपानमन्नेनाप्यायस्व ।

apānaman'nēnāp'yāyas'va ।

श्रद्धायाँ व्याने निविश्यामृतꣳ हुतम् ।

śhrad'dhāyāām' vyānē niviśh'yāmṛtagm' hutam ।

व्यानमन्नेनाप्यायस्व ।

vyānaman'nēnāp'yāyas'va ।

श्रद्धायामुदाने निविश्यामृतꣳ हुतम् ।

śhrad'dhāyāmudānē niviśh'yāmṛtagm' hutam ।

उदानमन्नेनाप्यायस्व ।

udānaman'nēnāp'yāyas'va ।

श्रद्धायाꣳ समाने निविश्यामृतꣳ हुतम् ।

śhrad'dhāyāgm' samānē niviśh'yāmṛtagm' hutam ।

समानमन्नेनाप्यायस्व ॥ ९१ ॥ ॥ ७० ॥

samānaman'nēnāp'yāyas'va ॥ 91 ॥ ॥ 70 ॥

www.SaiVeda.net

[१०-७१-१]   [10-71-1]

अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः ।
aṅ’guṣh’ṭhamāt’ra[fp]’ puruṣhō (a)ṅ’guṣh’ṭhañ’
cha samāśh’ritaḥa ।

ईशस्सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक् ॥ ९२ ॥ ॥ ७१ ॥
īśhas’sar’vas’ya jagata[fp]’ prabhu[fp]’
prīṇāti viśh’vabhuke ॥ 92 ॥ ॥ 71 ॥

[१०-७२-१]   [10-72-1]

वाङ्म , आसन्न् ।
vāṅ’ma , āsan’ne ।

नसोः प्राणः ।
nasō[fp]’ prāṇaḥa ।

अक्ष्योश्चक्षुः ।
ak’ṣhyōśh’chak’ṣhuḥu ।

कर्णयोश्श्रोत्रम् ।
kar’ṇayōśh’śhrōt’ram’m ।

बाहुवोर्बलम् ।
bāhuvōr’balam’m ।

ऊरुवोरोजः ।
ūruvōrōjaḥa ।

अरि॑ष्टा॒ विश्वा॒न्यङ्गा॑नि त॒नूः ।
ariṣh’ṭā viśh’vān’yaṅ’gāni tanū-ḥu ।

त॒नुवा॑ मे स॒ह नम॑स्ते , अस्तु॒ मा मा॑ हिꣳसीः ॥ ९३ ॥ ॥ ७२ ॥
tanuvā mē saha namas’tē ,
as’tu mā mā higm’sī-ḥi ॥ 93 ॥ ॥ 72 ॥

[१०-७३-१] [10-73-1]

वय॑स्सुप॒र्णा , उप॑सेदु॒रिन्द्रं॑ प्रि॒यमे॑धा॒ , ऋष॑यो॒ नाध॑मानाः ।
vayas’supar’ṇā , upasēdurin’dram’ priyamēdhā ,
ṛṣhayō nādhamānā-ḥa ।

अप॑ ध्वा॒न्तमू॑र्णु॒हि पू॒र्द्धि
चक्षु॑र्मुमु॒ग्ध्य॑स्मान्नि॒धये॑ऽव ब॒द्धान् ॥ ९४ ॥ ॥ ७३ ॥
apad’ dhvān’tamūūr’ṇuhi pūrd’dhi
chak’ṣhur’mumug’dhyas’mān’nidhayē
(a)va bad’dhā-ne ॥ 94 ॥ ॥ 73 ॥

[१०-७४-१] [10-74-1]

प्राणानां ग्रन्थिरसि रुद्रो मा॑ विशा॒न्तकः ।
prāṇānān’ gran’thirasi rud’rō mā viśhān’takaḥa ।

तेनान्नेना॒प्यायस्व ॥ ९५ ॥ ॥ ७४ ॥
tēnān’nēnāāp’yāyas’va ॥ 95 ॥ ॥ 74 ॥

www.SaiVeda.net

[१०-७५-१]   [10-75-1]

नमो रुद्राय विष्णवे मृत्युर्मे पाहि ॥ ९६ ॥ ॥ ७५ ॥

namō rud'rāya vish'ṇavē mṛt'yur'mē pāhi ॥ 96 ॥ ॥ 75 ॥

[१०-७६-१]   [10-76-1]

त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ।

tvamag'nēd' dyubhis'tvamāśhuśhuk'ṣhaṇis'
tvamad'bhyas'tvamaśh'manas'pari ।

त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां
नृपते जायसे शुचिः ॥ ९७ ॥ ॥ ७६ ॥

tvaṁ' vanēēbh'yas'tvamōṣhadhībh'yas'tvan' nṛṇān'
nṛpatē jāyasē śhuchiḥi ॥ 97 ॥ ॥ 76 ॥

[१०-७७-१]   [10-77-1]

शिवेन मे सन्तिष्ठस्व स्योनेन मे सन्तिष्ठस्व सुभूतेन मे सन्तिष्ठस्व
ब्रम्हवर्चसेन मे सन्तिष्ठस्व यज्ञस्यर्द्धिमनु सन्तिष्ठस्वोप ते
यज्ञ नम , उप ते नम , उप ते नमः ॥ ९८ ॥ ॥ ७७ ॥

śhivēna mē san'tiṣh'ṭhas'vas' syōnēna mē
san'tiṣh'ṭhas'va subhūtēna mē
san'tiṣh'ṭhas'vab' bram'havar'chasēna mē
san'tiṣh'ṭhas'va yaj'ñas'yard'dhimanu
san'tiṣh'ṭhas'vōpa tē yaj'ña nama , upa tē
nama , upa tē namaḥa ॥ 98 ॥ ॥ 77 ॥

[१०-७८-१]   [10-78-1]

सत्यं परं परꣳ सत्यꣳ सत्येन न सुवर्गाल्लोकाच्च्यवन्ते कदाचन सताꣳ हि

sat'yam' param' paragm' sat'yagm'

sat'yēna na suvar'gāl'lōkāt'chyavan'tē

kadāchana satāgm' hi

सत्यं तस्मात्सत्ये रमन्ते तप , इति तपो नानशनात्परं यद्धि परं

sat'yan' tas'māāt' sat'yē raman'tē tapa , iti tapō

nānaśhanāt'parañ' yad'dhi paran'

तपस्तद्दुर्धर्षं तद्दुराधर्षं तस्मात्तपसि रमन्ते दम , इति नियतं

tapas'tad'dur'dhar'shan' tad'durādhar'shan'

tas'māt'tapasi raman'tē dama , iti niyatam'

ब्रम्हचारिणस्तस्माद्दमे रमन्ते शम ,

इत्यरण्ये मुनयस्तस्माच्छमे रमन्ते

bram'hachāriṇas'tas'mād'damē

raman'tē śhama , it'yaraṇ'yē

munayas'tas'māt'chhamē raman'tē

दानमिति सर्वाणि भूतानि प्रशꣳसन्ति

दानान्नातिदुश्चरं तस्माद्दाने रमन्ते

dānamiti sar'vāṇi bhūtānip' praśhagm'san'ti

dānān'nātidush'charan' tas'māād' dānē raman'tē

www.salvedanet

ध॒र्म॑ , इ॒ति ध॒र्मे॑ण॒ सर्व॑मि॒दं परि॑गृहीतं ध॒र्मान्नाति॑दु॒ष्क॒रं

dhar’ma , iti dhar’mēṇa sar’vamidam’
parigṛhītan’ dhar’mān’nātidush’karan’

तस्मा॑द्ध॒र्मे॑ र॑मन्ते प्र॒जन॒ , इ॒ति भूया॑ꣳसस्तस्मा॒द्भूयि॑ष्ठाः प्र॒जा॑यन्ते

tas’māād’dhar’mē raman’tēp’ prajana ,
iti bhūyāgm’sas’tas’mād’bhūyiṣh’ṭhā[fp]’
prajāyan’tē

तस्मा॒द्भूयि॑ष्ठाः प्र॒जन॑ने रमन्ते॒ऽग्नय॒ ,
इ॒त्या॑ह॒ तस्मा॑द॒ग्नय॒ , आधा॑तव्याः

tas’mād’bhūyiṣh’ṭhā[fp]’ prajananē raman’tē
(a)g’naya , it’yāha tas’mādag’naya , ādhātav’yā ,

अ॒ग्नि॒हो॒त्रमि॒त्या॑ह॒ तस्मा॑द॒ग्नि॒हो॒त्रे र॑मन्ते य॒ज्ञ ,
इति॑ य॒ज्ञो हि दे॒वास्तस्मा॑द्य॒ज्ञे

ag’nihōt’ramit’yāha tas’mādag’nihōt’rē raman’tē
yaj’ña , iti yaj’ñō hi dēvās’tas’māād’yaj’ñē

र॑मन्ते मा॒नस॒मिति॑ वि॒द्वा॒ꣳस॒स्तस्मा॑द्वि॒द्वा॒ꣳस॑ ,
ए॒व मा॑न॒से र॑मन्ते न्या॒स , इति॑

raman’tē mānasamiti
vid’vāgm’sas’tas’māād’vid’vāgm’sa ,
ēva mānasē raman’tēn’ nyāsa , itib’

ब्रम्हा ब्रम्हा हि परः परो हि ब्रम्हा तानि वा ,
एतान्यवराणि परांसि न्यास ,
bram’hāb’ bram’hā hi para[fp]’
parō hib’ bram’hā tāni vā ,
ētān’yavarāṇi parāgm’sin’ nyāsa ,

एवात्यरेचयद्य , एवं वेदेत्युपनिषत् ॥ ९९ ॥ ॥ ७८ ॥
ēvāt’yarēchayad’ya ,
ēvam’ vēdēēt’yupaniṣhate ॥ 99 ॥ ॥ 78 ॥

[१०-७९-१] [10-79-1]

प्राजापत्यो हारुणिस्सुपर्णेयः प्रजापतिं पितरमुपससार किं भगवन्तः
prājāpat’yō hāruṇis’supar’ṇēya[fp]’ prajāpatim’
pitaramupasasāra kim’ bhagavan’ta[fp]’

परमं वदन्तीति तस्मै प्रोवाच सत्येन
वायुरावाति सत्येनादित्यो रोचते दिवि
paramam’ vadan’tīti tas’maip’ prōvācha
sat’yēna vāyurāvāti sat’yēnādit’yō rōchatē divi

सत्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं तस्मात्सत्यं परमं वदन्ति
sat’yam’ vācha[fp]’ pratiṣh’ṭhā sat’yē
sar’vam’ pratiṣh’ṭhitan’ tas’māāt’sat’yam’
paramam’ vadan’ti

तप॑सा दे॒वा दे॒वता॒मग्र॑ , आय॒न्तप॒सर्ष॑य॒स्सु॒वर॒न्वविन्द॒न्तप॑सा

tapasā dēvā dēvatāmag'ra ,

āyan'tapasar'ṣhayas'suvaran'vavin'dan'tapasā

स॒पत्ना॒न्प्रणु॑दा॒मारा॑ती॒स्तप॑सि स॒र्वं

प्रति॑ष्ठितं॒ तस्मा॒त्तप॑ः पर॒मं वद॑न्ति

sapat'nān'praṇudāmārātīs'tapasi sar'vam'

pratiṣh'ṭhitan' tas'māt'tapa[fp]'

paramaṁ' vadan'ti

दमे॑न दा॒न्ताः कि॒ल्बिष॑मवधू॒न्वन्ति॒ दमे॑न

ब्रम्हचा॒रिण॒स्सुव॑रगच्छ॒न्दमो॑

damēna dān'tā[hk]' kil'biṣhamavadhūn'van'ti

damēnab' bram'hachāriṇas'

suvaragat'chhan'damō

भू॒ताना॑ं दुरा॒धर्षं॒ दमे॑ स॒र्वं प्रति॑ष्ठितं॒ तस्मा॒द्दम॑ः पर॒मं वद॑न्ति

bhūtānāān' durādhar'ṣhan' damē

sar'vam' pratiṣh'ṭhitan' tas'mād'dama[fp]'

paramaṁ' vadan'ti

शमे॑न शा॒न्ताश्शि॒वमा॒चर॑न्ति शमे॑न ना॒कं

मु॒नयो॒ऽन्वविन्द॒ञ्छमो॑ भू॒ताना॑ं

śhamēna śhān'tāśh'śhivamācharan'ti

śhamēna nākam' munayō

(a)n'vavin'dañ'chhamō bhūtānāān'

www.SaiVeda.net

दुराधर्षञ्छमे सर्वं प्रतिष्ठितं तस्माच्छमः परमं वदन्ति दानं
durādhar’ṣhañ’chhamē sar’vam’ pratiṣh’ṭhitan’
tas’māt’chhama[fp]’ paramaṁ’ vadan’ti dānañ’

यज्ञानां वरूथं दक्षिणा लोके दातारꣳ सर्वभूतान्युपजीवन्ति
yaj’ñānāṁ’ varūthan’ dak’ṣhiṇā lōkē
dātāragm’ sar’vabhūtān’yupajīvan’ti

दानेनारातीरपानुदन्त दानेन द्विषन्तो
मित्रा भवन्ति दाने सर्वं प्रतिष्ठितं
dānēnārātīrapānudan’ta dānēnad’ dviṣhan’tō
mit’rā bhavan’ti dānē sar’vam’ pratiṣh’ṭhitan’

तस्माद्दानं परमं वदन्ति धर्मो विश्वस्य जगतः प्रतिष्ठा लोके
tas’māād’dānam’ paramaṁ’ vadan’ti dhar’mō
viśh’vas’ya jagata[fp]’ pratiṣh’ṭhā lōkē

धर्मिष्ठं प्रजा , उपसर्पन्ति धर्मेण पापमपनुदति धर्मे सर्वं
dhar’miṣh’ṭham’ prajā , upasar’pan’ti
dhar’mēṇa pāpamapanudati dhar’mē sar’vam’

प्रतिष्ठितं तस्माद्धर्मं परमं वदन्ति प्रजननं वै प्रतिष्ठा लोके
pratiṣh’ṭhitan’ tas’māād’dhar’mam’ paramaṁ’
vadan’tip’ prajananaṁ’ vaip’ pratiṣh’ṭhā lōkē

www.sanatanveda.net

साधु प्रजायाँस्तन्तुं तन्वानः पितृणामनृणो
भवति तदेव तस्या , अनृणं

sādhup’ prajāyāās’tan’tun’ tan’vāna[fp]’
pitṛṇāmanṛṇō bhavati tadēva tas’yā , anṛnan’

तस्माँत्प्रजननं परमं वदन्त्यग्नयो वै त्रयी विद्या देवयानः पन्था

tas’māāt’prajananam’ paramaṁ’
vadan’tyag’nayō vait’ trayī vid’yā
dēvayāna[fp]’ pan’thā

गार्हपत्य , ऋक्पृथिवी रथन्तरमन्वाहार्यपचनं यजुरन्तरिक्षं

gār’hapat’ya , ṛk’pṛthivī
rathan’taraman’vāhār’yapachanañ’
yajuran’tarik’ṣhaṁ’

वामदेव्यमाहवनीयस्साम सुवर्गो लोको बृहत्तस्मादग्नीन्परमं

vāmadēv’yamāhavanīyas’sāma suvar’gō
lōkō bṛhat’tas’mādag’nīn’paramaṁ’

वदन्त्यग्निहोत्रꣳ सायं प्रातर्गृहाणां
निष्कृतिस्स्विष्टꣳ सुहुतं यज्ञक्रतूनां

vadan’tyag’nihōt’ragm’ sāyam’
prātar’gṛhāṇān’ niṣh’kṛtis’sviṣh’ṭagm’
suhutañ’ yaj’ñak’ratūnām’

प्रायणꣳ सुवर्गस्य लोकस्य ज्योतिस्तस्मादग्निहोत्रं
परमं वदन्ति यज्ञ , इति
prāyaṇagm' suvar'gas'ya lōkas'yaj'
jyōtis'tas'mādag'nihōt'ram' paramaṁ'
vadan'ti yaj'ña , iti

यज्ञेन हि देवा दिवं गता यज्ञेनासुरानपानुदन्त
यज्ञेन द्विषन्तो मित्रा
yaj'ñēna hi dēvā divaṅ' gatā
yaj'ñēnāsurānapānudan'ta
yaj'ñēnad' dviṣhan'tō mit'rā

भवन्ति यज्ञे सर्वं प्रतिष्ठितं तस्माद्यज्ञं
परमं वदन्ति मानसं वै
bhavan'ti yaj'ñē sar'vam' pratiṣh'ṭhitan'
tas'māād'yaj'ñam' paramaṁ' vadan'ti
mānasaṁ' vaip'

प्राजापत्यं पवित्रं मानसेन मनसा
साधु पश्यति मानसा , ऋषयः प्रजा ,
prājāpat'yam' pavit'ram' mānasēna manasā
sādhu paśh'yati mānasā , ṛṣhaya[fp]' prajā ,

असृजन्त मानसे सर्वं प्रतिष्ठितं तस्मान्मानसं परमं वदन्ति न्यास
asṛjan'ta mānasē sar'vam' pratiṣh'ṭhitan'
tas'māān'mānasam' paramaṁ' vadan'tin' nyāsa

www.sai-veda.net

इत्याहुर्मनीषिणो ब्रम्हाणं ब्रम्हा विश्वः कतमस्स्वयंभुः

it'yāhur'manīṣhiṇōōb' bram'hāṇam' bram'hā viśh'va[hk]' katamas'svayam'bhu[fp]'

प्रजापतिस्संवत्सर , इति संवत्सरोऽसावादित्यो य ,

एष , आदित्ये पुरुषस्स

prajāpatis'saṁ'vat'sara , iti saṁ'vat'sarō (a)sāvādit'yō ya , ēṣha , ādit'yē purushas'sa

परमेष्ठी ब्रम्हात्मा याभिरादित्यस्तपति

रश्मिभिस्ताभिः पर्जन्यो वर्षति

paramēṣh'ṭhīb' bram'hāt'mā yābhirādit'yas'tapati raśh'mibhis'tābhi[fp]' par'jan'yō var'ṣhati

पर्जन्येनौषधिवनस्पतयः प्रजायन्त , ओषधिवनस्पतिभिरन्नं

par'jan'yēnauṣhadhivanas'pataya[fp]' prajāyan'ta , ōṣhadhivanas'patibhiran'nam'

भवत्यन्नेन प्राणाः प्राणैर्बलं बलेन तपस्तपसा श्रद्धा श्रद्धया मेधा

bhavat'yan'nēnap' prāṇā[fp]' prāṇair'balam' balēna tapas'tapasāśh' śhrad'dhāśh' śhrad'dhayā mēdhā

www.saiveda.net

मेधया मनीषा मनीषया मनो मनसा
शान्तिश्शान्त्या चित्तं चित्तेन स्मृतिङ्ग् स्मृत्या

mēdhayā manīṣhā manīṣhayā manō manasā
śhān’tiśh’śhān’tyā chit’tañ’ chit’tēnas’
smṛtig’ges’ smṛt’yās’

स्मारङ्ग् स्मारेण विज्ञानं विज्ञानेनात्मानं वेदयति तस्मादन्नं

smārag’ges’ smārēṇa vij’ñānaṁ’
vij’ñānēnāt’mānaṁ’ vēdayati tas’mādan’nan’

ददन्त्सर्वाण्येतानि ददात्यन्नात्प्राणा भवन्ति भूतानां प्राणैर्मनो

dadan’tsar’vāāṇ’yētāni dadāt’yan’nāāt’prāṇā
bhavan’ti bhūtānāām’ prāṇair’manō

मनसश्च विज्ञानं विज्ञानादानन्दो
ब्रंम्ह योनिस्स वा , एष पुरुषः पञ्चधा

manasaśh’cha vij’ñānaṁ’
vij’ñānādānan’dōb’ bram’ha yōnis’sa vā ,
ēṣha puruṣha[fp]’ pañ’chadhā

पंञ्चात्मा येन सर्वमिदं प्रोतं पृथिवी चान्तरिक्षं च द्यौश्च

pañ’chāt’mā yēna sar’vamidam’ prōtam’
pṛthivī chān’tarik’ṣhañ’ chad’ dyauśh’cha

दिशश्चावान्तरदिशाश्च स वै सर्वमिदं जगत्स स भूतं स भव्यं

diśhaśh’chāvān’taradiśhāśh’cha sa vai
sar’vamidañ’ jagat’sa sa bhūtagm’ sa bhav’yañ’



www.Salvedа.net

जिज्ञासक्लृप्त , ऋतजा रयिष्ठाश्श्रद्धा सत्यो महस्वान्तपसोवरिष्ठाद्ज्ञात्वा तमेवं

jij'ñāsak'lṛp'ta , ṛtajā rayiṣh'ṭhāśh'śhrad'dhā sat'yō mahas'vān'tapasōvariṣh'ṭhād'jñāt'vā tamēvam'

मनसा हृदा च भूयो न मृत्युमुपयाहि विद्वान्तस्मान्न्यासमेषां

manasā hṛdā cha bhūyō na mṛt'yumupayāhi vid'vān'tas'māān'nyāsamēṣhān'

तपसामतिरिक्तमाहुर्वसुरण्वो विभूरसि प्राणे त्वमसि संधाता

tapasāmatirik'tamāhur'vasuraṇ'vō vibhūrasip' prāṇēt' tvamasi san'dhātāb'

ब्रम्हन्त्वमसि विश्वधृत्तेजोदास्त्वमस्यग्निरसि वर्चोदास्त्वमसि सूर्यस्य

bram'han'tvamasi viśh'vadhṛt'tējōdās'tvamas'yag'nirasi var'chōdās'tvamasi sūr'yas'yad'

द्युम्नोदास्त्वमसि चन्द्रमस , उपयामगृहीतोऽसि ब्रम्हणे त्वा महस ,

dyum'nōdās'tvamasi chan'dramasa , upayāmagṛhītō (a)sib' bram'haṇēēt' tvā mahasa ,

www.Sarvavedah.net

ओमित्यात्मानं युञ्जीतैतद्वै महोपनिषदं देवानां गुह्यं य , एवं वेद

ōmit'yāt'mānañ' yuñ'jītaitad'vai

mahōpaniṣhadan' dēvānāṅ'

guh'yañ' ya , ēvaṁ' vēdab'

ब्रम्हणो महिमानमाप्नोति तस्माद्ब्रम्हणो

महिमानमित्युपनिषत् ॥ १०० ॥ ॥ ७९ ॥

bram'haṇō mahimānamāp'nōti

tas'māād'bram'haṇō

mahimānamit'yupaniṣhate ॥ 100 ॥ ॥ 79 ॥

[१०-८०-१] [10-80-1]

तस्यैवं विदुषो यज्ञस्यात्मा यजमानश्श्रद्धा पत्नी शरीरमिध्ममुरो

tas'yaivaṁ' viduṣhō yaj'ñas'yāt'mā

yajamānaśh'śhrad'dhā pat'nī

śharīramidh'mamurō

वेदिर्लोमानि बर्हिर्वेदश्शिखा हृदयं यूपः काम , आज्यं मन्युः

vēdir'lōmāni bar'hir'vēdaśh'śhikhā hṛdayañ'

yūpa[hk]' kāma , āj'yam' man'yu[fp]'

पशुस्तपोऽग्निर्दमश्शमयिता दक्षिणा वाग्घोता प्राण , उद्गाता

paśhus'tapō (a)g'nir'damaśh'śhamayitā

dak'ṣhiṇā vāg'ghōtāāp' prāṇa , ud'gātā



www.Sathveda.net

चक्षुरध्वर्युर्मनो ब्रम्हा श्रोत्रमग्नीद्यावद्ध्रियते सा दीक्षा यदश्नाति

chak’ṣhuradh’var’yur’manōb’ bram’haśh’
śhrōt’ramag’nīd’yāvad’dhriyatē sā
dīk’ṣhā yadaśh’nāti

तद्धविर्यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदो

tad’dhavir’yat’pibati tadas’ya sōmapānañ’
yad’ramatē tadupasadō

यत्संचरंत्युपविशंत्युत्तिष्ठंते च स प्रवर्ग्यो यन्मुखं तदाहवनीयो या

yat’sañ’charat’yupaviśhat’yut’tiṣh’ṭhatē cha sap’
pravar’gyō yan’mukhan’ tadāhavanīyō yāv’

व्याहृतिरहुतिर्यदस्य विज्ञानं तज्जुहोति यत्सायं प्रातरत्ति तत्समिधं

vyāhṛtirahutir’yadas’ya vij’ñānan’ taj’juhōti
yat’sāyam’ prātarat’ti tat’samidhañ’

यत्प्रातर्मध्यंदिनꣳ सायं च तानि सवनानि ये ,
अहोरात्रे ते दर्शपूर्णमासौ

yat’prātar’madh’yan’dinagm’ sāyañ’ cha tāni
savanāni yē , ahōrāt’rē tē dar’śhapūr’ṇamāsau

येऽर्द्धमासाश्च मासाश्च ते चातुर्मास्यानि य ,
ऋतवस्ते पशुबन्धा ये

yeē (a)rd’dhamāsāśh’cha māsāāśh’cha tē
chātur’mās’yāni ya , ṛtavas’tē paśhuban’dhā yē

www.sarvaveda.net

संवत्सराश्च परिवत्सराश्च तेऽहर्गणास्सर्ववेदसं वा , एतत्सत्रं
saṁ’vat’sarāśh’cha parivat’sarāśh’cha tē (a)har’gaṇās’sar’vavēdasaṁ’ vā , ētat’sat’rañ’

यन्मरणं तदवभृथं , एतद्वै जरामर्यमग्निहोत्रꣳ सत्रं य , एवं
yan’maraṇan’ tadavabhṛtha , ētad’vai jarāmar’yamag’nihōt’ragm’ sat’rañ’ ya , ēvaṁ’

विद्वानुदगयने प्रमीयते देवानामेव महिमानं
गत्वाऽऽदित्यस्य सायुज्यं
vid’vānudagayanēp’ pramīyatē dēvānāmēva mahimānaṅ’ gat’vā (ā)dit’yas’ya sāyuj’yaṅ’

गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव
महिमानं गत्वा चन्द्रमसः
gat’chhat’yatha yō dak’shiṇēp’ pramīyatē pitṛṇāmēva mahimānaṅ’ gat’vā chan’dramasas’

सायुज्यꣳ सलोकतामाप्नोत्येतौ वै
सूर्याचन्द्रमसोर्महिमानौ ब्राम्हणो
sāyuj’yagm’ salōkatāmāp’nōt’yētau vai sūūr’yāchan’dramasōōr’mahimānauūb’ brām’haṇō

विद्वानभिजयति तस्माद्ब्रम्हणो महिमानमाप्नोति तस्माद्ब्रम्हणो
vid’vānabhijayati tas’māād’bram’haṇō mahimānamāp’nōti tas’māād’bram’haṇō

www.SriVedia.net

महि॒मान॒म्ं ॥ १०१ ॥ ॥ ८० ॥
mahimānam’m ॥ 101 ॥ ॥ 80 ॥

महि॒मान॑मित्यु॒प॒निषत् ॥ १०१ ॥ ॥ ८० ॥
mahimānamit’yupaniṣhate ॥ 101 ॥ ॥ 80 ॥

अम्भ॒स्येकपञ्चा॒श॒दु॑त्तरश॒तं जा॒तवे॑दसे॒ चतु॑र्दश॒ भूर॒न्नं भूर॒ग्नये॑
am’bhas’yēkapañ’chāśhadut’taraśhatañ’ jātavēdasē chatur’daśha bhūran’nam’ bhūrag’nayē

भूर॒ग्नये॑ चैक॑मेकं पाहि पा॒हि च॒त्वारि॑ च॒त्वारि॒ यश्छन्द॑सां॒ द्वे नमो॑
bhūrag’nayē chaikamēkam’ pāhi pāhi chat’vāri chat’vāri yaśh’chhan’dasān’ dvē namō

ब्रम्ह॑ण , ऋ॒तं तपो॒ यथा॑ वृ॒क्षस्यैक॑मेकम॒णोरणी॑या॒ङ्ं
bram’haṇa , ṛtan’ tapō yathā
vṛk’ṣhas’yaikamēkamaṇōraṇīyāgeśh’

श्चतु॑स्त्रिꣳशत्सहस्र॒शीर्षꣳ॒ षड्विꣳशतिरादि॒त्यो वा ,
ए॒ष , आ॑दि॒त्यो वै ते॒ज , एक॑मेकं॒
chatus’trigm’śhat’sahas’raśhīr’ṣhagm’
ṣhaḍ’vigm’śhatirādit’yō vā , ēṣha ,
ādit’yō vai tēja , ēkamēkan’

निध॑नपत॒ये त्रयो॑विꣳशतिस्स॒द्योजा॒तं त्रीणि॑
nidhanapatayēt’ trayōvigm’śhatis’
sad’yōjātan’ trīṇi

www.Vedanet

वामदे॒वायैकं॑म॒घोरे॑भ्य॒स्तत्पु॑रुषाय॒ द्वे द्वे॒ ,
ईशानो नमो हिरण्यबाहव ,
vāmadēvāyaikamaghōrēēbh'yas'tat'puruṣhāyad' dvēd' dvē , īśhānō namō hiraṇ'yabāhava ,

एकं॑मेकमृ॒तꣳ स॒त्यं द्वे सर्वो॒ वै च॒त्वारि॒
कद्रु॒द्राय॒ त्रीणि॒ यस्य॒ वैकं॑ङ्कती
ēkamēkamṛtagm' sat'yan' dvē sar'vō vai chat'vāri kad'rud'rāyat' trīṇi yas'ya vaikaṅ'katī

कृणु॒ष्व पाजोऽदि॑ति॒रापो॒ वा , इ॒दमेकं॑मेक॒मापं॑ः
पुनन्तु च॒त्वार्य॑ग्निश्च सूर्य॑श्च नवं
kṛṇuṣh'va pājō (a)ditirāpō vā , idamēkamēkamāpa[fp]' punan'tu chat'vār'yag'niśh'cha sūr'yaśh'cha nava

नवो॒मिति॑ च॒त्वार्याया॑तु॒ पञ्चौजोऽसि॒ दशो॒त्तमे॑
च॒त्वारि॒ घृणि॒स्त्रीणि॒ ब्रम्हमे॑तु॒ मां
navōmiti chat'vār'yāyātu pañ'chaujō (a)si daśhōt'tamē chat'vāri ghṛṇis'trīṇib' bram'hamētu māñ'

यास्ते॑ ब्रम्हह॒त्यां द्वाद॑श॒ ब्रम्ह॑ मे॒धया॒ऽद्या न , इ॒मं भ्रूणह॒त्यां
yās'tēēb' bram'hahat'yān' dvādaśhab' bram'ha mēdhayā (a)d'yā na , imam' bhrūṇahat'yām'

ब्रम्हं मे॒धवां॑ ब्रम्हा दे॒वाना॑मि॒दं वी॑रह॒त्यामेका॒न्न वि॑ꣳशति॒रेका॒न्न

bram’ha mēdhavāāb’ bram’hā dēvānāmidaṁ’ vīrahat’yāmēkān’na vigm’śhatirēkān’na

वि॑ꣳशतिर्मे॒धा दे॒वी मे॒धां म॒ ,
इन्द्र॑श्चत्वारि॒ चत्वा॒र्यां मां॑ मे॒धा द्वे मयि॑

vigm’śhatir’mēdhā dēvī mēdhām’ ma ,
in’draśh’chat’vāri chat’vār’yā māām’
mēdhād’ dvē mayi

मे॒धामेक॒मपै॑तु प॒रं वातं॑ प्रा॒णम॑मु॒त्रभू॒याद्धरि॑ꣳ शल्कै॑र॒ग्निं मा

mēdhāmēkamapaitu param’ vātam’
prāṇamamut’rabhūyād’dharigm’
śhal’kairag’nim’ mā

छिं॑दो मृत्यो॒ मा नों॑ मह॒न्तं॒ मा न॑स्तो॒के
प्रजा॑पते स्वस्ति॒दा त्र्य॑म्बकं॒ ये तें॑

chhidō mṛt’yō mā nō mahān’tam’ mā nas’tōkēp’
prajāpatēs’ svas’tidāt’ tryam’bakañ’ yē tē

सह॒स्रम॒युतं॒ द्वे द्वें॒ मृत्यवे॒ स्वाहैकं॑ दे॒वकृ॒तस्यैका॑द॒श यद्वों॑ दे॒वाः

sahas’ramayutan’ dvēd’ dvē
mṛt’yavēs’ svāhaikan’
dēvakṛtas’yaikādaśha yad’vō dēvā[hk]’

www.Sai Veda.net

कामोऽकार्षीन्मन्युरकार्षीद्वे द्वे तिलाञ्जुहोमि
गावश्श्रियं प्रजाः पञ्च तिलाः
kāmō (a)kār'ṣhīn'man'yurakār'ṣhīn'dvēd' dvē
tilāñ'juhōmi gāvaśh'śhriyam'
prajā[fp]' pañ'cha tilā[hk]'

कृष्णाश्चोरस्य श्रीः प्रज्ञातु जातवेदस्सप्त
प्राणवाक्त्वक्छिर , उत्तिष्ठ पञ्च
kṛṣh'ṇāśh'chōras'yaśh' śhrī[fp]' praj'ñātu
jātavēdas'sap'tap' prāṇavāk'tvak'chhira ,
ut'tiṣh'ṭha pañ'cha

पृथिवीशब्दमनोवाग्व्यक्तात्माऽन्तरात्मा परमात्मा मे क्षुधेऽन्नमय
pṛthivīśhab'damanōvāg'vyak'tāt'mā
(a)n'tarāt'mā paramāt'mā mēēk'
kṣhudhē (a)n'namaya

पञ्चदशाग्नये स्वाहैकचत्वारिꣳशदोन्तद्ब्रम्ह नव श्रद्धायां प्राणे
pañ'chadaśhāg'nayēs'
svāhaikachat'vārigm'śhar'dōōn'tad'bram'ha
navaśh' śhrad'dhāyāām' prāṇē

निविष्टोऽमृतं जुहोमि चतुर्विꣳशतिश्श्रद्धायां प्राणे निविश्यामृतꣳ
niviṣh'ṭō (a)mṛtañ' juhōmi
chatur'vigm'śhatiśh'śhrad'dhāyāām'
prāṇē niviśh'yāmṛtagm'

www.sai veda net

हुतन्दशाङ्गुष्ठमात्रः पुरुषो द्वे वाङ्म ,
आसन्नष्टौ वयस्सुपर्णाः प्राणानां
hutan’daśhāṅ’guṣh’ṭhamāt’ra[fp]’
puruṣhōd’ dvē vāṅ’ma , āsan’naṣh’ṭau
vayas’supar’ṇā[fp]’ prāṇānāṅ’

ग्रन्थिरसि द्वे द्वे नमो रुद्रायैकं त्वमग्ने द्युभिर्द्वे शिवेन मे
gran’thirasid’ dvēd’ dvē namō rud’rāyaikan’
tvamag’nēd’ dyubhir’dvē śhivēna mē

सन्तिष्ठस्व सत्यं प्राजापत्यस्तस्यैवमेकमेकमशीतिः ॥ ८० ॥
san’tiṣh’ṭhas’va sat’yam’
prājāpat’yas’tas’yaivamēkamēkamaśhītiḥi ॥ 80 ॥

अम्भस्यपारे स्वस्ति नः पाहि नो , अग्न ,
एकयाऽऽदित्यो वा , एष , ऋतꣳ सत्यमोमित्या माँ
am’bhas’yapārēs’ svas’ti na[fp]’ pāhi nō , ag’na ,
ēkayā (ā)dit’yō vā , ēṣha , ṛtagm’
sat’yamōmit’yā māām’

मेधा मा नस्तोके तिलाञ्जुहोमि श्रद्धायाँ
प्राणे निविश्य तस्यैवमेकोत्तरशतम् ॥ १०१ ॥
mēdhā mā nas’tōkē tilāñ’juhōmiśh’
śhrad’dhāyāām’ prāṇē niviśh’ya
tas’yaivamēkōt’taraśhatam ॥ 101 ॥

www.sai-veda.net

[१०-०-०] [10-0-0]

स॒ह ना॑ववतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यं॑ करवावहै ।
ते॒ज॒स्वि ना॒वधी॑तमस्तु॒ मा वि॑द्वि॒षाव॒है॓ ।

saha nāvavatu । saha nau bhunak'tu ।
saha vīr'yaṅ' karavāvahai ।
tējas'vi nāvadhītamas'tu mā vid'viṣhāvahaiī ।

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

www.Sai Veda.net